॥ गर्भमालाप्रकाशेन ॥

श्रीगणेशाय नमः ॥ ॐ श्रीवासुदेवसुरवैरिभयंकरमाधरालिंगितसुंदरांगं
पदाब्जसंभूतपवित्रगांगंनमामितकारितदोषसंगं १ कणादनामानमृषिंप्र
णम्यगुरुंश्रुतौलौकिकुबोद्भवेन विनयतेभास्करशर्मणोत्रपदार्थमात्रानु
गतप्रकाशः २ विकीर्षितग्रंथस्यनिर्विघ्नसमाप्तयेकृतमाश्वरनमस्कारात्म
कंमंगलंशिष्यशिक्षार्थमादौनिबध्नातिस्वीकृतेत्यादि।अत्रनमस्यामइत्कृतम
पुरुषवद्बहुवचनप्रयोगवशाद्वयमित्यस्मच्छब्दबहुवचनमध्याहर्तव्यं।तथाचवं
यंनंदकुमारंनमस्यामइत्यन्वयः वयंविकीर्षितग्रंथनिर्विघ्नसमाप्तिकामाः नं
दस्यगोकुलपतेःकुमारंकंसादिदुष्टदैत्यनिबर्हणेनपांडवादिशिष्टजनपरिपा १
लनेननचधर्मस्थापनायवसुदेवकुक्षेवतीर्णंदीप्यमानंमयासंचितपुण्या

निशयवशात्तद्देहपुत्रभावेनलब्धंश्रीकृष्णमितियावत्।तथाचस्मृतिः।परित्रा
णायसाधूनांविनाशायचदुष्कृतां धर्मसंस्थापनार्थायसंभवामियुगेयुगे इ
ति।नमस्यामः कायवाङ्मनोभिःनमस्कारंकुर्मइत्यन्वयबोधः नमस्कारत्वंचैक
यिकादित्रितयसाधारणंजातिविशेषानुगतव्यवहारसिद्धः नचकायिकादौ
संयोगत्वादिनासंकरः।तस्यादृष्टत्वात्।अन्यथाधीसंकरस्यापिदूषणत्वा
पातात्।यद्वानमस्कारत्वंज्ञानत्वांतरजातिविशेषः।सचनमस्कार्यस्योपरुया
त्सृष्टत्वज्ञानरूपमानसननावेवास्ति।नचैवंकायिकवाचिकनत्योःकरशिरः सं
योगनमःशब्दादिरूपयोरभावः।तत्रोभयत्रमानसनैतिव्यंजकत्वानतिव्य
वहारस्यगौणत्वादितिचेत्।एकस्मिन्नपिग्रंथकर्तरियमितिबहुवचनप्रया

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

गोजात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां। अस्मदो द्वयोश्च। इत्यधुनैतास
नवत्वात्समाधयः। नन्वयंकृतोनश्रीकृष्णनमस्कारः। नंदकुमारस्यान्यस्यापिसंभ
वादतस्तल्लाभायनंदकुमारविशिनष्टि। स्वीकृतेत्यादि। स्वीकृतंरिंगणावसरदधि
दुग्धादिभोज्यालनप्रभृत्यन्याचरणदर्शनेनकुपितयशोदायाः भ्रमहरंबंधन
करणजनितभ्रमनिवर्तकंगोदामबंधनव्यसनयेनेतिविग्रहः। एतद्विशेषणस्य
श्रीकृष्णएवसत्वादत्रनंदकुमारःसएवलभ्यतइतिभावः। नचश्रीकृष्णस्यगोदाम
बंधनव्यसनेनकथंयशोदायाः भ्रमहरणंअन्यव्यसनेनान्यस्यभ्रमनिवृत्तेभा
दितिवाच्यं। बालदुश्चरितदर्शनकुपितजनन्याः बालशिक्षाकरणजनितभ्रम
निवृत्तिः बालताडनादिनाभाग्यतइत्यस्यसूत्रसिद्धत्वात्। एतेननंदकुमारस्यभ
क्तवत्सलत्वंसूचितं। अन्यथासर्वेश्वरेणतेनबंधनव्यसनस्वीकारासंभवात्। २

इत्थंचभक्तवत्सलत्वलाभेननमस्कर्तुःस्वस्यापीष्टसिद्धिरवश्यकीर्तिध्वनितं। न
नुव्यसनयोग्येनव्यसनस्वीकारकथंभक्तवत्सलत्वलाभः इत्यतस्तंपुनर्विशिनष्टि
। नलिनीदलसुकुमारमिति। नलिनीदलसुकुमारत्वाद्व्यसनायोग्यमितिभावा
र्थः। यद्वास्वत्यर्थमेतद्विशेषणं। नतिवत्स्वतेरपिमंगलत्वादितिश्लोकार्थः। ननुम
गलस्यसमाप्तिफलकत्वमनाभावः। नचानेनयत्किंचित्कर्मसहकृतंप्रत्यसमवा
यनिमित्तवाच्यं। मंगलसत्वेपिकचित्समाप्तेरसत्वात्। मंगलंविनापिप्रमत्तनास्तिका
नुष्ठितकर्मणिनत्वत्वाच्च। नापिमंगलंविकीर्षितकर्मसमाप्तिफलकं। तादृशसमा
प्तिकामनयासर्वैःक्रियमाणत्वात्। यत्कामनयासर्वैःक्रियमाणंतत्तत्फलकं
यथाज्योतिष्टोमकामनयाक्रियमाणंभोजनंतत्तत्फलकमितिसामान्यव्याप्तिमत्त्व

कमनुमानमितिवाच्यं। असिद्धेः। प्रमात्रादिसादृश्यसमाप्तिकामनयामंगलस्य
क्रियमाणत्वात्। नापिचिकीर्षितसमाप्तिकामोमंगलमाचरेदितिश्रुतिर्मानमितिवा
च्यं। तस्याः प्रत्यक्षेणानुपलंभादितिचेन्न। अत्रप्रांचः। शिष्टाचारानुमितश्रुतिरत्रमं
गलस्यसमाप्तिफलकत्वेमानं। तथाहि। मंगलंचिकीर्षितकर्मसमाप्तिकामकर्तव्य
त्वेनश्रुतिबोधितंनादृश्यसमाप्तिकामशिष्टाचारविषयत्वात्। यदुक्तंसाध्याभाव
इत्यादि। तदुक्तसाधनाभावव्यतिरेकिण्याचिकीर्षितकर्मसमाप्तिकामामंग
लमाचरेदित्याकारश्रुतिरनुमीयते। अत्रशिष्टत्वमिष्टसाधनत्वंशंकतेवं।
ननुवेदप्रामाण्याभ्युपगंतृत्वं। वेदप्रामाण्यानभ्युपगमविरोधिमत्वपार्थवसितं ३
विरोधीचसर्ववेदः स्वस्वार्थप्रमाणमितिज्ञानंनादरासंस्कारंध्वनेनप्रसुमशिष्ट

बोद्दशाप्तशिष्टवाक्यस्मृत्यविरहितं। गौरवात्। अनुपयोगाच्च। समा
प्तिकामबोद्धाचारविषयचैत्यवंदनादौव्यभिचारवारणस्यतावतापिसंभवात्। न
चशिष्टाचारस्यैवप्रमाणत्वसंभवान्नदनुमितश्रुत्यपन्यासोव्यर्थइतिवाच्यं। शिष्टा
चारस्यस्वतंत्रप्रमाणत्वाभावेनश्रुत्यनुमापकतयैवप्रामाण्यमितितदुपन्यासात्।
अतएवस्मृतेरिवशिष्टाचारस्यापिश्रुतिमूलकत्वेनैवप्रामाण्यमितिसिद्धांतः। अ
न्यथास्मृत्यादिस्मृत्याचारयोरपिप्रामाण्योपपत्तेः। अत्रसमाप्तित्वमेवफलतावच्छे
दकं। आरब्धंकर्मसमाप्यतामितिकामनयामंगलानुष्ठानात्। लाघवाच्च। ननु
निर्विघ्नसमाप्तित्वंगौरवात्। प्रागुक्तकामनायामुक्तत्वाच्च। निर्विघ्नसमाप्यतोद्दे
श्यकामनापक्षेपिविघ्नाभावस्यनफलत्वेपिननत्रविषयत्वं किंतुसमाप्युपायत्वेने

वविघ्नाभावपूर्विकासमाप्तिरस्त्विति तद्विरणात्। इत्थं चविघ्नाभावोमंगलस्यहेरे। समाप्तिश्चचरमकृतिध्वंसरूपेसंपूर्णत्वे। आद्यप्रकृतिरारंभइतिजैमिनीयाल क्षणानुसारात्। इदंचास्मदादिकृतिसाध्यकर्मसमानरचनत्वेन। अतःपरमेश्वरकृतिसाध्यद्व्यणुकादिसमानाधिकरणस्वान्तरवर्तिसत्यनपेक्षाकृतिः। तेनप्रथमकृतिमात्रजन्यकर्मसमानाधिकरणाव्याप्तिः। तत्रप्रथमकृतेरेवनिरुक्तचरमकृतित्वात्। तद्वाचकर्मणिस्वप्रतियोगिजन्यत्वसंबंधेन। वस्तुतस्तूत्पत्तिक्षणसंबंधनाशएवसमाप्तिरितिनकोपिदोषः। केचित्तुचरमवर्णध्वंसोग्रंथसमाप्तिरितिविशिष्यलक्षणमाहुः। तस्यचस्वप्रतियोगिघटितत्वसंबंधेननानावर्णसमुदायात्मकंग्रंथनिष्ठताबोध्या। यद्वा ४

मंगलंसफलंअविगीतशिष्टाचारविषयत्वात्यन्निहोत्रवदित्यनुमानेनमंगलस्यसामान्यतःसफलत्वसिद्धौकिंतत्फलमितिविशेषजिज्ञासायांविवक्षितकर्मसमाप्तिरेवफलत्वेनकल्प्यतेऽपस्थितत्वादिष्टत्वाच्च। बोद्धाचारविषयंचेत्यवंदनादौव्यभिचारवारणायशिष्टेति। विश्वामित्रकृतत्रिशंकुयाज्ययाजनेव्यभिचारवारणायाविगीतेति। शास्त्राविरुद्धत्वंचतदर्थः। अयाज्ययाजनंचशास्त्रविरुद्धमेव। नचैवंशिष्टपदवैयर्थ्यंशिष्टाचारविषयत्वात्अविगीताचारविषयत्वादितिहेतुद्वयेतात्पर्यात्। शिष्टाचारश्चशिष्टत्वप्रयुक्ताचारः। विश्वामित्रस्ययाज्ययाजनाचारस्तुलोभादिप्रयुक्तएवनिननव्यभिचारइतिबोध्यं। नचविध्यनिन्यायात्स्वर्गएवतत्फलंकल्प्यतामितिवाच्यं। अदृष्टकल्पनाप

त्रेः। संभवंतिदृष्टफलकत्वेअदृष्टकल्पनायाअन्याय्यत्वात्। अन्यथाभोजनादावप्य
विगीतशिष्टाचारविषयत्वेनस्वर्गकल्पनापत्तेः। नचप्रागुक्तान्वयव्यतिरेकव्यभि
चारज्ञानसत्वेऽकस्मादिनापिकर्मसमाप्तिफलकत्वबाधइतिवाच्यं। मंगलसत्वेपि
यत्रनसमाप्तिस्तत्रमंगलवैगुण्यंकल्प्यते। तदुक्तमाप्तपादैः। कर्मकर्तृसाधनावे दै
गुण्यात्फलाभावइति। यत्रत्वमंगलंविनैवसमाप्तिस्तत्रमन्मानरीयमेवतत्कल्पत
इति। नकोपिव्यभिचारइत्याहुः। नव्यास्तुमंगलस्यविघ्नाभावएवफलं। आरब्ध
कर्मणिनिर्विघ्नमस्त्विनिकामनयेवतदनुष्ठानात्। समाप्तिफलकत्वेपिनस्फु ५
टत्वेनावश्यकत्वाच्च। फलतावच्छेदकंचविघ्नाभावत्वंनचविघ्नप्रतियोगिकानि
त्याभावत्वं। तेनविघ्नात्यंताभावान्योन्याभावयोर्न्युदासः। नचाद्यतोविघ्नध्वं

सस्यमंगलजन्यत्वेप्यनादेः सत्प्रागभावस्यकथंतज्जन्यत्वमितिवाच्यं। योगक्षेमस
धारणमंगलजन्यत्वंविघ्नप्रागभावेपिसंभवतीतिमूलएवस्फुटत्वात्। नचस्वतः सि
द्धविघ्नात्यंताभाववतांतमंगलस्यनिष्फलत्वापत्तिरितिवाच्यं। इष्टत्वात्। पापभ
मेणप्रायश्चित्तस्येवविघ्नसंदेहनेस्वाफलत्वापत्तेः। प्रायश्चित्तेपापनिश्चयेवत
एवाधिकारित्वेपिमंगलेसंशयनिश्चयसाधारणविघ्नज्ञानवतएवाधिकारित्वात्
तथैवशिष्टाचारात्। नचमंगलंविनापिमंगलाख्यानादितोविघ्नाभावस्यसंभवाद्व्यभि
चारः। तस्यापिमंगलत्वात्। तदुक्तंशंकराधरणे। विघ्नोत्सारणासाधारणंकारणंम
गलमिति। समाप्तिप्रतिबंधकदुरितविशेषोविघ्नस्तस्योत्सारणमनित्याभाव
स्तदसाधारणंकारणंमंगलपदवाच्यमित्यर्थः। असाधारणपदंकार्यादिवारणा

यः अत्रापि शिष्टाचारणभ्रत्यनुमानमपेक्षते। मंगलंनिर्विघ्नकामकर्तव्यत्वेनभ्रक
तिबोधितं। निर्विघ्नकामशिष्टाचारविषयत्वात्। यद्दुक्तसाध्याभाववन्नदुक्तसाध
नाभाववद्यथाभोजनमितिव्यतिरेकिणाआरब्धकर्मणिनिर्विघ्नकामोमंगलमा
चरेदित्याकाराभ्रतिरनुमीयते। अन्यथामंगलस्यभोजनादेरिवलौकिकत्वापत्या
आरंभसमयेशिष्टानांनियतानुष्ठानंनस्यात्। अथमंगलेनविघ्नाभावसंपादने
पिसमाप्तिःकुतः। लोकावगतबुद्धिप्रतिभादिरूपहेतुसमाजादेवेतिगृहाण। इत्थं
चमंगलसत्वेपिक्वचित्समाप्त्यभावेलौकिकहेतुविरहादेवनतुतन्मंगलवैगुण्य
कल्पनं। मंगलंविनैवक्वचित्समाप्तिरपिस्वतःसिद्धविघ्नाद्यभावसहकृतलौ
किकहेतुसमाजादेवेतिनतज्जन्मांतरीयेमंगलकल्पनमित्यपिलाघवमित्या



दुः अथेत्यंपरंपरयास्वकीर्त्यनुवृत्तयेस्वनामग्रंथनामचदर्शयति। श्रीमतेत्या
दि। श्रीमतासकलशास्त्रपारंगमत्वजनितनैर्मल्यविशेषवतांतत्तद्धर्मिसमूह
तत्रयोरमतेसम्यगितिअन्वर्थसंज्ञयारामसंज्ञावता। युक्तयःसाधकबाधकप्रमाणो
पन्यासरूपास्तासांयोमौक्तिकानितैर्गुंफितायेथितापदार्थानांद्रव्यगुणादीनांम
ज्ञानंतत्प्रतिपादकशब्दविशेषणंविलक्षणविन्यासरूपंतन्नामकोग्रंथविशेष
इतियावत्। विदुषांपंडितानामेवविलासायदर्शनंजन्यसुखविशेषायतमुद्दि
श्यतियावत्। वितन्यतेस्तृप्यादिव्यापारविषयीक्रियतेइतियावत्। स्वग्रंथेनिवे
शितायाःपदार्थमालासंज्ञायाःप्रवृत्तिनिमित्तभूतंप्रसिद्धमालासाम्यंयुक्ति
मौक्तिकगुंफितेत्यनेनविलासायेत्यनेनचदर्शितं। प्रसिद्धमालाहिमौक्तिकगुं

फिताजनानांविलासायचजायतइयंचयुक्तिर्मोक्तिकगुंफितावि दुषामेवविलासायेति
विशेषः। २ प्रेक्षावत्प्रवृत्तयेविषयाधनुबंधचतुष्टयंसचयनशिष्याबधानायकर्तव्य
निरूपणंप्रतिजानीते। अत्रेत्यारभ्यनिरूप्यतेत्यनेन। अत्रपदार्थमालासंसर्कप्रकरणयं
थाइदंवनिरूप्यतेत्यनेनान्वयिनिरूपणहेतुमाह। साधर्म्यवैधर्म्याभ्यामिति।तत्री
यार्थःप्रकारित्वं।नयाचसाधर्म्यवैधर्म्यप्रकारकंनिखिलपदार्थतत्वज्ञानंनिश्रेयसोप
योगिमोक्षप्रयोजकमात्मतत्वज्ञानद्वारानथकारणमितियाकत्।इत्यतोऽपदार्थासह
र्माभ्यसाधर्म्यवैधर्म्यरूपानिरूप्यते।उद्देशलक्षणपरीक्षाभिःप्रतिपाद्यतइत्यर्थः।
ननुपदार्थतत्वज्ञानंनिःश्रेयसहेतुरेवकथंनेतिचेन्नात्मवविदित्वातिमृत्युमेती ति
श्रुत्यात्मतत्वज्ञानस्यैवमोक्षहेतुत्वंप्रतिपादनात्। आत्मानमेवविदित्वातिमृत्युंस
सारमत्येतीतिश्रुत्यर्थः।नत्रैवकारेणात्मेतरपदार्थतत्वज्ञानस्यव्यवच्छेदात्। कुतो

व्यवच्छेदइतिचेन्न। आत्मनिदेहादिनादात्म्यरूपमिथ्याज्ञानस्यसंसारहेतुतयात्मवि
षयकतत्वज्ञानस्यैवतादृशमिथ्याज्ञाननिवर्तकतेनसंसारनिवर्तकत्वसंभवति।नान्य
स्यतिव्यवच्छेदात्।ज्ञानस्यसमानविशेष्यकत्वेनैवमिथ्याज्ञाननाशकत्वात्।शुक्ति
विशेष्यकतत्वज्ञानेनैवतद्विशेष्यकरजतत्वज्ञानस्यनाशदर्शनात्।नचैवमीश्वरतत्वस्यो
नस्यापिसंसारहेतुमिथ्याज्ञाननिवर्तकत्वासंभवेमोक्षहेतुत्वंनस्यादितिवाच्यं।इष्टत्वान्
।नचैवंहेब्रह्मणीवेतिन्यायेपरंब्रह्मैवेतिश्रुतिविरोधइतिवाच्यं।ईश्वराहितत्वतोज्ञा
नःसन्मोक्षहेतुर्जीवात्मतत्वज्ञानंसंपादयतीतिअत्रश्रुतितात्पर्यात्।इत्थंचशास्त्रा
न्निखिलपदार्थतत्वज्ञानेसतिसारासारविवेकेनआत्मतत्वंज्ञासायांप्रयत्नसंपादितेश्र
श्रवणमनननिदिध्यासनैरात्मतत्वसाक्षात्कारेजायतेयतोमोक्षः श्रुतिवाक्योत्थ
मात्मज्ञानंश्रवणं।श्रोतव्यःश्रुतिवाक्येभ्यइतिस्मृतेःतेनासंभावनानिश्चितिः।श्रुत

स्ययुक्तिभिरनुचिंतनेमननंमंतव्यश्चोपपत्तिभिरितिस्मृतेः।तेनविपरीतभावनानिवृत्तिः
।मनस्यार्थस्यनैरंतर्येणानुसंधानंनिदिध्यासनं।तेनान्यभावनानिवृत्तिः।ननुश्रुतिवा
क्यादेवात्मश्रवणस्मृतिपुराणेतिहासादीनांकोपयोगइतिचेन्न।संवादार्थतदुपयोगा
इत्येके।मिथ्यास्रक्।श्रोतव्यःश्रुतिवाक्येभ्यइत्यत्रश्रुतिशब्दोप्रामाण्यशंकाशून्यशब्द
परोननुवेदमात्रपरः।तथाचयथाधिकारंश्रुतिवाक्यात्स्मृतिवाक्यात्पुराणादेर्लो
किकवाक्याद्वादेहेंद्रियादिव्यतिरिक्तमात्मानंश्रुत्वामननंनिदिध्यासनाभ्यांआत्मतत्व
साक्षात्कारःसंपादनीयः।अतएवविदुरादयोपिप्राप्यतत्त्वज्ञानंमुक्ताइतिश्रवणसंग
छते।अन्यथावैदिकवाक्यतेषामनधिकारंमुक्तत्वश्रवणंविरुध्येतेत्याहुः।कथात्मत
त्वज्ञानेनमोक्षत्वावच्छिन्नहेतुत्वेनाविनापिकाशीमरणादिनामोक्षात्पादादिनिवे ८
शःकाश्यांमरणावसरेश्रीविश्वेश्वरविहितनारकोपदेशेनात्मतत्त्वज्ञाननतोमो

क्षइत्यपगमात्।नदुःखंचिंतामणिरूपता।काशीमरणस्यतत्त्वज्ञानफलकत्वंचागमा
दवेति।अत्रहिजंतोःप्राणप्रयाणसमयेरुद्रस्तारकंब्रह्मव्याचष्टइत्यागमः।अत्रहि
काश्यांहि।तारकप्रणवंरामनामेतिकामनभेदेनतस्यब्रह्मत्वंनहोधकत्वादुपचर्य
ते।अथकिंपुनर्निश्चयसं।एकविंशतिदुःखाभावस्तदित्यवेहि।एकविंशतिदुःखानि
चशरीरंषडिंद्रियाणिषड्विषयाः।षडुद्वेगाःसुखंदुःखंचेतिसुखंगौणमेदात्।ष
ड्विषयेषुमनोविषयाःइच्छाद्वेषप्रयत्नाश्चविषयाः।ननुबुद्धिसुखदुःखानितेषांष
ण्णांगुणानांनात्मनोपिमनोविषयत्वेनदुःखत्वंस्यात्।तस्यभोक्तृत्वेनविषय
त्वाभावात्।भोक्तृभिन्नत्वेसतिभोगसाधनस्यैवविषयत्वात्।विषसंपृक्तमधुनोवि
षत्ववत्सुखस्यापिदुःखमिश्रत्वात्दुःखत्वंनचस्वर्गस्यदुःखमिश्रत्वाद्दुःखत्वंन
स्यात्।तस्यापिपातभीतिजन्यदुःखमिश्रत्वात्।नचैवंयत्नदुःखेनसंभिन्नंनचग्रस

मनंतरं। अभिव्याप्योपनीतंचनत्सत्वंस्वःपदास्पदं। इत्येननविरोधइतिवाच्यं। पानभीति
दुःखेनदुःखासंभिन्नत्वस्यनदर्थत्वात्। अत्रनित्यानांस्वरूपनएवनाशः नित्यानांम
नःप्रकृतीनांसंबंधतएवनाशइतिप्राज्ञैः। नव्यास्तु। आत्यंतिकदुःखध्वंसोमोक्षः। दुः २
खध्वंसआत्यंतिकत्वंस्वसमानाधिकरणदुःखासमानकालीनत्वं। स्वमोक्षत्वेना
भिमतादुःखध्वंसः। संसारकालीनदुःखध्वंसेनिव्याप्तिवारणायासमानकालीनं
नेतिध्वंसविशेषणं। मुक्तमोक्षस्यास्मदादिदुःखसमानकालीनत्वान्नाव्याप्तिवारण
यस्वसमानाधिकरणेतिप्राथमिकदुःखविशेषणं। उपांत्यदुःखध्वंसोपिस्वसमा
नाधिकरणचरमदुःखसमानकालीनएवेतिननातिव्याप्तिः। अनएवस्वसमा
नाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसोमोक्षइतिप्रत्यूक्तं। उपांत्य ९
दुःखध्वंसस्यस्वसमानाधिकरणोयोदुःखप्रागभावस्तदसमानकालीनत्वेननत्रा

नित्यानेः। यदिचस्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वंदुःखस्येव
विशेषणंनदोक्तानित्यात्मभावेपिप्रागभावस्यप्रवेशेनगौरवंनवेतिदुःखध्वंस
स्यमोक्षत्वेमानाभावः। तरतिशोकमात्मवित्। तमेवविदित्वातिमृत्युमेतीत्यादिश्रु
तेरेवमानत्वात्। दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनंतरापा
दादपवर्गः। बाधनालक्षणादुःखतदंतनिमोक्षोपवर्गशब्दादिसमानतंत्रत्वेप्य
नस्यैवमोक्षत्वप्रतिपादनाच्चेत्याहुः। दीधितिस्तुतत्र। नित्यसुखाभिव्यक्तिर्मोक्षः। न
चजीवात्मनिनित्यसुखमानाभावः। आनंदंब्रह्मणोरूपंतच्चमोक्षेप्रतिफलतिमिश्र
तरेवमानत्वात्। आनंदमिति नपुंसकनिर्देशः। श्छांदसः ब्रह्मणोजीवस्यानंदात्म
करूपंस्वभावोनागंतुकोधर्मइतियावत्। नचरूपंच। मोक्षेआत्मतत्त्वज्ञाना
निःशेषकर्मक्षये। प्रतिष्ठितं। अभिव्यक्तंभवतीतिभ्रत्यर्थः। नचधर्मत्वसुखत्वा

म्यांकार्यकारणभावान्नभ्रक्त्यानित्यसुखप्रतिपादनं। धर्मत्वावच्छिन्ननिरूपित
कार्यतानाजन्यसुखत्वेनैवावच्छेदात्विजातीयत्वविजातीयसुखंप्रतिविजातीयवि
जातीयधर्मत्वेनहेतुत्वावश्यकतयासामान्यकार्यकारणभावेमानाभावाच्चेतिभद्द
मतपरिष्कारमाहुः तच्चिंत्यं अशरीरंवावसंतंनप्रियाप्रियेस्पृशतइतिश्रुतिविरो
धात्। उक्तश्रुतौनिरूपदानंदपदान्नित्यानंदत्वप्रकारकबोधासंभवेननित्यसुखवा
सिद्धश्च। पराक्तावच्छेदकप्रकारकबोधस्यैवोत्पादानच्चनित्यविज्ञानमान
दंब्रह्मेतीश्वरपरश्रुतौनित्यविज्ञानस्यास्वानत्वेनबोधवत्प्रकृतश्रुतावपिमोक्ष
दशायांशरीराद्यभावेनजन्यानंदबोधान्नित्यानंदस्यैवानंदत्वेनबोधइतिवाच्यं। द्व
ष्टांतेनित्यज्ञानसाधकस्यज्ञानत्वेनकार्यत्वेनकार्यकारणभावलक्षणतत्कस्यसत्वा
दुचितसामान्यतस्तस्यबोधः। दार्ष्टांतिकेतुनित्यानंदसाधकतत्कविरहेणसामान्य

तोपितस्यबोधासंभवः। तर्कसहकारेणैवश्रुतेरर्थप्रमापकत्वात्। अन्यथानिप्रसंग
त्। नचानंदपदाल्लक्षणयानित्यानंदबोधः। नित्यानंदस्यप्रमाणांतरसिद्धतयातत्रल
क्षणासंभवात्। किंचधर्मत्वसुखत्वाभ्यांअनादिपरंपराप्रहीनकार्यकारणभाव
लक्षणप्रतिबंधेतर्कपराहतंनित्यानंदसाधनं। नचधर्मत्वजन्यसुखत्वाभ्यामेवका
र्यकारणभावः सचनित्यानंदसाधनविरोधीतिवाच्यं। नित्यानंदस्यासिद्धतयाकार्य
तावच्छेदकेनधर्मत्वेनजन्यत्वविशेषणोपादानानौचित्यात्। यच्चोक्तंविजातीयविजा
तीयधर्मत्वेनहेतुत्वावश्यकतयासामान्यकार्यकारणभावोसिद्धइति। तन्न। यद्दिश
वयोरिनित्यायेनतादृशसामान्यकार्यकारणभावस्यापिसिद्धेः। अपिचनित्यस्य
रूपस्यकिमोक्षदशायांमोक्षदशायांशरीराद्यभावादुत्पादासंभवः। इत्थंचनि

त्यसुखाभिव्यक्तिर्मोक्षइतिरिक्तंवचइतिसमासः।एतेनदीधितिकारीयंनित्यंविज्ञा
मानंब्रह्मेतिभ्रुतिवचनादीश्वरेनित्यसुखव्यवस्थापनमपिप्रत्युक्तं। यत्त्वाहभवा
नंदः विज्ञानपदंविशेषणजानातीतिकर्तृव्युत्पत्त्याविज्ञानवत्यरं आनंदपदमपिआ
नंदोस्यास्तीत्यर्थीयाच्प्रत्ययांतयाआनंदवत्परमितिसर्वतार्किकासंमतं।तथा
चविज्ञानानंदविशिष्टेब्रह्मणिनित्यत्वान्वयान्नित्यज्ञानस्येवनित्यानंदस्यापितत्सि
द्धिः।इतिचन्न।अनित्योघटइत्यत्रघटत्वनित्यत्वस्यैवअनादिपरंपरारहितध्वंस
सुखत्वाभ्यांकार्यकारणभावेजागरूकेआनंदेनित्यत्वान्वयासंभवात्।तस्माद्दुः
खाभावविशिष्टंयद्यपिभ्रुतौआनंदपदमुभयवादिसिद्धदुःखाभाववत्त्वाक्षणिकमितितार्किकैरा ११
त्यासर्वमवदातं।अन्यथापसिद्धांतस्यदुःपरिहरत्वादितिदिक्।नन्वत्रविषयाध

नुबंधचतुष्टयंकथंसूचितमितिचेदुच्यते।निरूपितयोक्ताःपदार्थतद्धर्माःअस्यंथ
स्यविषयः।प्रतिपाद्यार्थोविषयइतिलक्षणात्।निःश्रेयसंमुख्यंप्रयोजनं।प
दार्थतत्त्वज्ञानंचावांतरप्रयोजनं।ग्रंथविषययोःप्रतिपाद्यप्रतिपादकभावःसंबंधः
।ग्रंथप्रयोजनयोश्चप्रयोज्यप्रयोजकभावःसंबंधः।अथनिःश्रेयसकामा
धिकारीतिकथंविज्ञातं।नचग्रंथप्रवृत्तिरिष्टसाधनताज्ञानेनैवस्यादितिकिंवि
षयादिचतुष्टयज्ञानेनेतिवाच्यं।ग्रंथप्रवृत्तौविषयादिचतुष्टयज्ञानजन्येष्टसाध
नताज्ञानस्यैवफलत्वेनहेतुत्वकल्पनात्।तदुक्तं।ज्ञातार्थज्ञातसंबंधंश्रोतुंश्रोताप्र
वर्तते।ग्रंथादौतेनवक्तव्यःसंबंधःसप्रयोजनइति।अर्थः।प्रयोजनंग्रंथेसंबध्यते
।सचनिसंबंधोविषयः।अतएवविषयादिज्ञानाधीनशुश्रूषाजन्यश्रुतिविष
यत्वंसंदर्भग्रंथइतिलक्षणंसंगच्छते।ननुनयापिनिरूपणप्रतिज्ञयाकथं

शिष्यावधानमितिचेन्न। अपूर्वार्थप्रतिज्ञायांविपर्यंतरमनोविशिनिरूपमवधा
नंजायतइत्यसार्वजनीनत्वादित्यलमप्रस्तुतेन। निरूपणप्रतिज्ञायांप्रधानतयो
क्ताःपदार्थाःकेइतिशिष्याकांक्षायांप्रथमपदार्थनिरूपणमारभतेतत्रेत्यादिना।त
त्रेतिनिर्धारणसप्तम्यंतं।तथाचपदार्थतद्धर्मेषुमध्येपदार्थेइत्यादयःसप्तेत्यर्थः।त
द्धर्मस्यसर्वनामतयाबुद्धिस्थत्वाच्चकलाघवाच्चसामान्यतःपूर्वपरामर्शित्वेनैवनिय ५
मानत्वव्यवहितपूर्वपरामर्शित्वेनविशेष्यपरामर्शित्वेनवागौरवात्।तेनप्रकृततत्रे
त्यनेनपदार्थतद्धर्मयोरेवपरामर्शोननुतन्निरूपणस्येतिभावः। नचतथानियमपि
पदार्थधर्मयोरितिनिरूपणस्यापिपरामर्शःस्यात्पूर्वत्वाविशेषादितिवाच्यं।यत्ना
त्पर्यंतस्यैवपरामर्शात्। अतएवयत्रपूर्वोपन्यस्तसर्वधर्मेषुनात्पर्यंतत्रसर्वपरामर्शी १२
चुचितएव। यथादधिमधुघृतंधानाउदकंतंडुलास्तत्संसर्गेप्राजापत्यमित्य

अतइत्यनेनेदमादेः। केचित्तुप्रतिज्ञातंपदार्थतद्धर्मनिरूपणंआरभतेतत्रेत्यादि।तत्रे
तिभावसप्तम्यंतं।कर्तव्यइत्यध्याहारः।तथाचपदार्थतद्धर्मनिरूपणंकर्तव्येपदार्थाद्र
व्यादयःसप्तेत्यादिपदार्थनिरूपणं।धर्मनिरूपणंतुयद्यपीत्यादिनाग्रेकरिष्यतइतिभा
वइतिव्याचक्षते। ननूद्रव्यविधेयभावरूपेविधेयस्याद्रव्यव्यापकत्वंलभ्यतेनतथाच
प्रकृतेपिपदार्थमुद्दिश्यद्रव्यादीनांविधानातेषांतद्व्यापकत्वंवाच्यंनचनसंभवतिायः
पदार्थस्तद्द्रव्यगुणादिवेतिव्यापकतायांमियोव्यभिचारात्इत्यतआह।अथेत्यादि।
अथपदार्थाइत्यादयइतिविभागवाक्येपदार्थमुद्दिश्येति।नन्विहपदार्थस्यनोद्देश्यत्वं
नाविद्यादीनांविधेयत्वं।यद्यद्देश्योगःप्रायेणभवेदुद्देश्यलक्षणं।नचद्देश्यागौ
र्नयंस्याद्विधेयस्यलक्षणमितिनलक्षणानाकांक्षेतादितिचेन्न।लक्ष्यानुरोधेन
हिलक्षणकरणंननुलक्षणानुरोधेनलक्ष्यव्यवस्था।तथाचयत्रप्रायेणतु

द्रव्यं यत्रानंतर्यतद्विधेयं। यत्र छद्रव्यागस्तोत्सर्गिकोनियतः। यद्वा द्रव्यविधेयत्वेस्वरू
पसंबंधविशेषो लाघवात्। अतएवयजेतस्वर्गकामइत्यादौस्वर्गादेरुद्देश्यत्वंयागादेश्च
विधेयत्वंसंगच्छते। इत्थंचप्रकृतेपदार्थेद्रव्यादयोऽद्रव्यविधेयतायांनकापिक्षतिरि
क्ता। द्रव्यादयन्यतमत्वेनेति। यःपदार्थःसद्रव्यादयन्यतमत्वंद्रव्यादिसमनियतत्वंतस्य
प्रसिद्धंसमानाधिकरण्यप्रसिद्धेरतआह। द्रव्यादीति। तत्तदधिकरणप्रसिद्धद्रव्यादिभे
दसमकालिसमत्वावच्छिन्नप्रतियोगिताकात्यंताभावत्वंद्रव्यादयन्यतमत्वमित्यर्थः
। द्रव्येगुणादिभेदषट्कमस्तिननुद्रव्यभेदःएवंगुणादौद्रव्यादिभेदषट्कंननुगुणा
दिभेदइतिभेदसमकस्यकुत्राप्यसत्वादितिभावः। द्रव्यादयन्यतमत्वेनपदार्थव्यापक १३
त्वंलभ्यतइत्थंचांतरक्षिपतिनन्विति। धूमवान्वह्निमान्नित्यादौविधेयतावच्छेदकव
ह्निमत्वादिनावह्निमतोधूमवद्व्यापकत्वंनादात्म्यसंबंधावच्छिन्नंलभ्यते। धूमवंतमु

ना द्देश्यवह्निमत्तयादात्म्यनविधौनेयंयदिचधूमवंतमुद्देश्यवह्निरूपधर्मिविधानंतदावि
धेयतावच्छेदकंवह्नित्वंतेनैवचधूमवद्व्यापकत्वंयोधूमवान्नतत्रवह्निरित्येवरूपंलभ्यते।
उद्देश्यव्यापकत्वमपिद्रव्यतावच्छेदकावच्छिन्नव्यापकत्वंबोध्यं। इतरथावह्निमान्धूमवा
न्द्रव्यादावीदृधर्मप्रभावावह्निमत्वावच्छिन्नव्यापकत्वस्यधूमवत्तिसत्वेनप्रमाणत्वाप
त्तिरिति। अन्यथेति। यत्किंचिद्रूपेणविधेयस्योद्देश्यव्यापकत्वेवह्निमान्धूमवान्नित्यादौ
विधेयस्यधूमवतोधूमस्यचाद्रव्यत्वेनसत्वेनप्रमेयत्वादिनावाव्यापकत्वलाभःस्या
दित्यर्थः। इष्टापत्तावपीति। वह्निमान्धूमवान्नित्यादौद्रव्यत्वादिनाव्यापकत्वेइष्टाप
त्तौनहिसंनियमनात्यर्थकंस्यात्। नन्वपीष्टापत्तौतद्वाक्यंप्रमाणंस्यादित्यतआहार्थः
ननुतद्वाक्यस्यद्रव्यत्वादिनानियमपरत्वंप्रमाणत्वंवेष्टमवेत्यरुचेर्दीपांतरमाह। आधि
क्यपीति। यद्वानन्वन्यत्रविधेयतावच्छेदकरूपेणैवविधेयस्योद्देश्यव्यापकत्वलाभोरुच

प्रकृतेनुद्रव्यादिसमानाधिकरणसामान्यतमत्वेनैवव्यापकत्वंवाच्यं।अन्यथानुपपत्त्यानथैवस्वीकारा
दित्यरुचेरीषांतरमाह।आधिक्येपीति।अपिरप्यर्थेसामान्यतमत्वादिनेत्यनेनसंबध्यते।
नथाचयदियत्किंचिद्रूपेणविधेयस्याद्रव्यव्यापकत्वंतदासमानाधिकरणसंभावनायांप
दार्थाद्रव्यादयइतिविभागवाक्यसमानाधिकरणसामान्यतमत्वादिनापिव्यापकत्वं
संभवतीतिद्रव्यादिसमानाधिकरणसामान्यतमत्वेनव्यापकत्वबोधात्पदार्थानांन्यूनसंख्याव्यवछे
दलाभेपधिकसंख्याव्यवछेदलाभोनुपपन्नइतिभावः।ननुयत्किंचिद्रूपेणविधे
यस्याद्रव्यव्यापकत्वेउक्तदोषादरुढविधेयतावछेदकेनैवसर्वत्रव्यापकत्वं।प्रकृतेपि
द्रव्यादिसामान्यतमत्वेनैवविधेयतावछेदकमितितेनव्यापकत्वबोधवर्णनंनानुपपन्नमि
त्यतआह।प्रकृतेचेति।नविधेयतेति।द्रव्यादिसामान्यतमत्वेनविधेयतावछेदकमित्यर्थः १४
।शब्दात्पदार्थाद्रव्यादयइतिशब्दात्।तेनद्रव्यादिसामान्यतमत्वेन।किंतुद्रव्यत्वादिनेति

।अत्रापिविधेयतेतिप्राक्तनंसंबध्यते।नचाद्रव्यत्वादिकमेवविधेयतावछेदकं
शब्दात्तेनद्रव्यादीनामुपस्थितेः।शब्दाहिविधेयस्यैवरूपेणोपस्थितिमत्येवविधेय
तावछेदकत्वादितिभावः।तेनाद्रव्यत्वादिना।आक्षेपंसमाधत्तेविधेयतेति।विधेय
तासमव्यापकरूपंप्रायोविधेयतावछेदकमेवकचिद्विशेषशब्दासुपस्थितमपिद्रव्यं
नादृशरूपावछिन्नव्यापकत्वस्यशाब्दबोधप्रकारतयाभानासंभवात्।इहघटत्वसं
योगवित्यादाविवशब्दोपस्थितस्यापिसंसर्गितयाभानेबाधकाभावाद्बोधेसंसर्गी
नयेति।नचाधूमवान्वह्निमानित्यादावनिरूपितव्यापकतावछेदकवह्निमत्वाव
छिन्नतादात्म्येनवह्निमद्धान्धूमवानितिवाक्यार्थबोधोवक्तव्यः।प्रकृतेपिसनिरूपि
तव्यापकतावछेदकद्रव्यादिसमानाधिकरणसामान्यतमत्वावछिन्नतादात्म्येनद्रव्यादिसमानाधिकरणःपदार्थो
द्रव्यमितिवाक्यार्थबोधः।उभयत्रापिस्वउद्देश्यत्वेनाभिमतः।अत्रव्यापकत्वेसोपदर्शित

संसर्गकोद्वोप्रविष्टत्वात्संसर्गतयाभानंबोध्यं।नह्याभान्।इत्यादौनांपदार्थव्यापक
त्वलाभात्।ननूद्देश्यविधेयभावरूपेविधेयनिष्ठोद्देश्यव्यापकतापकारत्वेनभाव
स्यसर्वानुभवसिद्धत्वात्संसर्गतयाभानस्वीकारेमानाभावः।नचप्रकृतेघ्याद्यन्य ८
तमत्वस्यशाब्दानुपस्थितत्वयानदवच्छिन्नव्यापकतायाःप्रकारत्वेनभानानुपपत्ति
रवसंसर्गतयाभानस्वीकारेमानमितिवाच्यं।अनुपपत्तिशतेनाप्यनुभवस्थवारयि
तुमशक्यत्वादित्यरुचेराह।यद्वेति।गुरुचरणास्तु।ननुप्रकृतेइत्यादीनांविधेयता
इत्यत्वादिप्रातिस्विकरूपेण।इत्यादयःसमेतिसमूहालंबनधीविशेष्यत्वेनवा।ना
घः।तथासतिइत्यत्वगुणत्वाद्यवच्छिन्नविधेयताभेदाद्वाक्यभेदापत्तिः।इत्याद्य १५
न्यतमत्वस्यतत्समव्याप्यत्वासंभवश्चेत्।नोक्तः।तादृशधीविशेष्यत्वस्यशब्दानुपस्थि ९
तेः।उपस्थितौचनैवव्यापकत्वमस्तुनुशाब्दइत्यादावन्यतमत्वेनेत्यरु

चेराहयद्वेतीत्याहुः।प्रथमद्वितीयादिपदश्रवणकालेयावद्भिर्जनीयानामनुपस्थि
त्यानत्रपदेनावदन्यतमत्वावच्छिन्नेनिरुक्तलक्षणानसंभवतीत्यतश्चरमपदइति।
तावदन्यतमत्वे।तावदन्यतमत्वारूपालक्ष्यतावच्छेदकावच्छिन्ने।लक्ष्यतावच्छेदकाल
क्षणानभ्युपगमादितिभावः।निरुक्तलक्षणेति।इत्थंचप्रकृतेप्यभावपदेइत्याद्य
न्यतमत्वावच्छिन्नेनिरुक्तलक्षणास्वीकारेणइत्याद्यन्यतमत्वेनइत्याद्युपस्थितिसं
भवात्तदपिविधेयतावच्छेदकमेवेतितेनैवपदार्थव्यापकत्वंभिद्यतेहं।तथाचसर्व
त्रविभागवाक्येविधेयतावच्छेदकरूपेणैवविधेयस्योद्देश्यव्यापकत्वाद्वह्निमान्धू
मवानित्यादौविधेयस्येत्यत्वादिनाव्यापकत्वप्रसंगरूपःप्रागुक्तदोषोनेत्यर्थः।
एतत्कल्पेव्यापकत्वस्यप्रकारतयैवभानात्।धूमवान्वह्निमानित्यादौस्वनिरूपित
व्यापकतावच्छेदकवह्निमत्तावच्छिन्नाभिन्नोधूमवानित्यभेदसंसर्गकोबोधःप्रकृ

तपिस्वनिरूपितव्यापकतावच्छेदक इत्यादिसामान्यतमत्वावच्छिन्नाभिन्नाःपदार्थाइत्य
भेदसंसर्गकएवबोधः।स्वउद्देश्यत्वेनाभिमतं।उभयत्रापिकल्पेविधेयस्योद्देश्यव्याप
कत्वंतादात्म्येनेत्यकक्रप्रायं।अत्रव्यापकत्वस्योपदर्शितप्रकारकोटौप्रविष्टत्वात्प्रकार
तयाभानेबोध्यं।निरूढिलक्षणात्वंचान्वयानुपपत्तिप्रतिसंधानंविनायतोऽर्थविशे
षःप्रतीयतेतत्समर्थविशेषेनियतनात्पर्यकत्वेनेतिनिगर्वः।ननूद्देश्यविधेयभावस्थ
लेविधेयस्योद्देश्यव्यापकत्वबोधःशक्त्यालक्षणयावा।नाद्यः।उद्देश्यविधेयपदयो
स्तत्रशक्तिरहात्।नांत्यः।उद्देश्यपदविधेयपदवालक्षणायांविनिगमकाभावा
दितिचेन्नाबोधेउद्देश्यस्यमुख्यत्वात्तत्पदलक्षणायाअयुक्तत्वेनविधेयपदएव
उद्देश्यव्यापकत्वविशिष्टविधेयतावच्छेदकावच्छिन्नलक्षणयातद्बोधसंभवात्।
नचबोधितपदस्यबोद्देश्यपदसमभिव्याहृतविधेयपदस्यापिव्यापकत्वेशक्तिरे



वास्तितिवाच्यं।दृष्टांतेनित्यंबीप्सयेत्यनुशासनस्यव्यापकत्वशक्तिग्राहकस्यस
त्वात्।अत्रचनद्विरहात्।केचित्तु।उद्देश्यविधेयसमभिव्याहारवशात्उपस्थितस्योद्दे
श्यव्यापकत्वस्यमनसैवविधेयतावच्छेदकावच्छिन्नसंसर्गबोधइत्याहुः।एतेनेतिय
देतिविकल्पाश्रयणेनद्रव्यत्वावच्छिन्नविधेयतानिरूपकत्वंसापिनेत्यर्थः
।इत्याद्यन्यतमत्वावच्छिन्नविधेयतायाएकस्याएवस्वसमस्वीकारइतिभावः।शंक
तेनतथापीति।इत्याद्यन्यतमत्वेनपदार्थव्यापकत्वेपीत्यर्थः।विभाजकोपाधीनां।द्र
व्यत्वगुणत्वादीनां।परीक्षकेभ्यः।परीक्षयैवलब्धुंयोग्यः।इदंचन्यूनत्वव्यवच्छेदवि
शेषणं।कुतइत्यनेनउक्तव्यापकत्वबोधादपिनसंभवतीतिसूचितं।ननुद्रव्यगुणेत्या
दिपृथक्त्वादेशादेवपदार्थन्यूनत्वव्यवच्छेदलाभःस्यादतआहपृथक्त्वभिदेश्यस्येति।
तेषांविभाजकोपाधीनांसंभवात्तद्भेदेपिसंभवात्।शंकांपरिहरतिअन्यतमत्वेति।

पदार्थव्यापकतावच्छेदकद्रव्याद्यन्यतमत्ववदादिवृत्त्यून्नत्वव्यवच्छेदत्वाभद्रव्य
र्थः। उद्देश्यव्यापकतावच्छेदकतावद्द्रव्यतमत्वस्यून्नत्वव्यवच्छेदद्रव्यात्वाद्व्याप्यत्वं
वच्यापकस्योन्नयनादितिभावः। इत्थंचव्यापकस्यून्नत्वव्यवच्छेदस्यनिवृत्तौव्याप्या
भूतनद्रव्यतमत्वस्यनिवृत्तिरावश्यकीत्याह। न्यूनत्वेइति। पदार्थानांन्यूनत्वेइत्यर्थः।
पृथिवीघटइति। पृथिवीभेदवृत्तिघटभेदवृत्तित्वावच्छिन्नाभाववदित्यर्थः। तस्या
द्रव्यभेदवृत्तिगुणादिषड्भेदवृत्तित्वासमत्वावच्छिन्नाभावरूपद्रव्याद्यन्यतमत्व
स्य। वेत्यर्थेनेति। यथाघटस्यापिपृथिवीत्वात्पृथिवीभेदवृत्तित्वेनैनघटभेदवृत्ति
त्वस्यापिलाभात्तद्द्रव्यर्थमितिपृथिवीभेदवृत्तिघटभेदवृत्तित्वावच्छिन्नाभावो
सिद्धस्तथापदार्थानांन्यूनत्वेगुणस्यापिद्रव्यत्वाद्द्रव्यभेदवृत्तीत्यनेनेवगुणभेदवृ
त्तित्वस्यापिलाभात्तद्द्रव्यर्थमितिद्रव्यभेदवृत्तिगुणादिषड्भेदवृत्तिसमत्वावच्छि

न्नाभावोप्यसिद्ध इत्यर्थः। सांकर्येपिसामानाधिकरण्येपिद्रव्याद्यन्यतमत्वेनपदा
र्थद्रव्याद्योर्व्याप्यव्यापकभावसिद्धोसत्यांद्रव्यत्वगुणत्वादेःसांकर्येन्यूनत्वव्यवच्छेदा
भावरूपंसर्वत्रैववक्ष्यमाणं। तद्द्रव्यतमत्वव्यापकस्यन्यूनत्वव्यवच्छेदस्यनिवृत्तौव्या
पीभूततद्द्रव्यतमत्वस्यापिनिवृत्तिप्रसंगादतस्तद्द्रव्यतमत्वेपदार्थद्रव्याद्योर्व्याप्य
व्यापकभावसिद्धोसत्यामेवतत्सांकर्यंवक्ष्यमाणंतथाचनसांकर्यापपत्तयेकश्चि
त्तदसांकर्यमप्युपेयं। तत्रतत्रासंकीर्णानात्यारेकत्रसांकर्यस्यैवजातिसांकर्यपदार्थत्वा
त्। एवंचद्रव्यत्वगुणत्वादेःक्वचिदसांकर्यसिद्धौपदार्थानांसमन्यूनत्वव्यवच्छेदसिद्धि
रावश्यकीत्याशयेनप्रागुक्तशंकांपरिहरति। तन्नेत्यादिना। द्रव्याद्यन्यतमत्ववत्पदा
र्थद्रव्याद्योर्व्याप्यव्यापकभावस्तदसिद्धोसत्यामेवोच्यमानोद्रव्यत्वगुणत्वा
दिजातिसांकर्यादिबाधकांतरात्तदसांकर्यस्यापिसंभवादित्यप्तरार्थः। रिगधैस्क।

उक्तव्यापकत्वस्याधिकपव्यवच्छेदरूपत्वेऽपगतेन्यूनत्वव्यवच्छेदरूपत्वमप्युपपद्यं।तुल्य
न्यायात्।इत्थंचन्यूनत्वव्यवच्छेदस्यकुतइतिप्रश्नानुपपत्तिरेवउक्तव्यापकत्वबोधंविने
यैन्यूनाधिकसंख्याव्यवच्छेदबोधंवर्णयंतिनन्वेतदपिदूषयितुमुपन्यस्यति।परेत्वि
ति।विशेषेत्यादि।वामेनपश्यतीतिविशेषविधेर्दक्षिणेननपश्यतीत्यादिनिषेधस्य
उक्तत्वं।दक्षिणेननपश्यतीत्यादिविशेषनिषेधस्यचवामेनपश्यतीत्यादिविधिबो
धकत्वकत्वंनतुतत्रसामान्यरूपणपरार्थत्वादिनावगतानांद्रव्यगुणत्वादि
विशेषरूपणाभिधानस्यन्यूनाधिकसंख्याव्यवच्छेदबोधकत्वंव्युत्पत्तिसिद्धम
नादिश्चतात्पर्यसिद्धमित्यर्थः।अतएव।विशेषरूपणाभिधानस्यन्यूनाधिकसं
ख्याव्यवच्छेदकबोधकतायांव्युत्पत्तिसिद्धत्वादेव।विभागव्याघातं।विभागविरो १८
धं।विभागाभासत्वमित्यावत्।तादृशविभागेनवस्तुतोन्यूनाधिकसंख्याव्य

व्यवच्छेदबोधासंभवादितिभावः।अन्यथा।विशेषरूपणाभिधानस्यन्यूनाधिकसंख्या
व्यवच्छेदबोधकत्वाभावे।अथोक्तस्यासंभवादिति।द्व्याणिपृथिव्यप्तेजांसीत्यादन्यू
नाधिकसंख्याव्यवच्छेदरूपविषयबाधप्रयुक्तमयोग्यत्वंवाच्यं।तच्चनसंभवति।त
वमतेतद्विषयकत्वस्यैवाभावात्।तदन्यविषयत्वस्यबाधादयोग्यत्वासंभवइत्य
र्थः।मतंदूषयतिनन्विति।नास्तीत्यादिनिपदार्थेनसामान्यूनत्वंनास्तीत्य
स्यसंग्रहः।निरुक्तेति।द्व्याद्यन्यतमत्वेनव्यापकत्वस्यैवेत्यर्थः।ननुनिरुक्तव्यापक
त्वबोधस्यैवयदिन्यूनाधिकसंख्याव्यवच्छेदबोधरूपत्वंतर्हिनिरुक्तव्यापकत्वबोध
कत्वमेवविशेषरूपणाभिधानस्यस्वीक्रियतांमतमाह।तद्बोधस्यचेति।निरुक्तव्या
पकत्वबोधस्यैवेत्यर्थः।उक्तरीत्यैवा।विधेयतासमभिव्याहृतरूपणेत्यावृत्तिरीत्यैव।पु
नरुक्तत्वादिति।विशेषरूपणाभिधानस्यनिरुक्तव्यापकत्वबोधकत्वेस्वतंत्रश्रुत्य

त्तिकल्पनामपेक्ष्योक्तरीत्तेर्घुत्वादितिभावः। ननु पदार्थत्वसामानाधिकरण्येन द्रव्यादीनां द्रव्यत्वादिनान्वयसंभवे किमुक्तरीत्यत्यन्तमाह। सर्वत्रेति। नत्वावपदार्थत्वावच्छेदेन द्रव्यादीनामन्यतमत्वेनैवान्वयोवाच्यः सङ्ख्यानोक्तरीत्तिर्विनेतिनदादरइतिभावः। विशेषरूपेणाभिधानस्थले न्यूनाधिकसंख्याव्यवच्छेदबोधोमानसानुमानेनैववा भविष्यतिकिंनिरुक्तव्यापकत्वेनत्यनिप्रायवानाहंकृते। नचास्त्विति। तद्बोधः। न्यूनाधिकसंख्याव्यवच्छेदबोधः। मनसेतिव्याप्तिज्ञानासत्वेनत्सत्वेत्याह। अनुगमनादेवेति। अयंवामनपश्यतीतिविशेषविधोदक्षिणेननपश्यतीतिविशेषनिषेधवाक्यं नेयंदक्षिणाक्षिकरणकज्ञानभ्रन्यः। वामाक्षिकरणकज्ञानवान्। दक्षिणाक्षिकरणकज्ञानभ्रन्यत्वेसत्यविचारकपक्षिज्ञानत्वादहमिवेत्यनुगमनाद्विशेषविधभ्रवोधइतिप्रकारोदृष्टांतः। एवंप्रकृतेपिपदार्थाद्रव्यादयइतिप्रकृतेपदार्थैः समभ्यो

न्यूनाधिकद्रव्यत्वादिसमकरूपेणाभिहितत्वेसतितदतिरिक्तरूपेणानभिहितत्वंसंख्याकान्यूनंनाप्यधिकं। यत्संख्याकरूपेणाभिहितत्वेसतितदतिरिक्तरूपेणानभिहितत्वं तत्संख्याकान्यूनंनाप्यधिकं। यथापृथिवीत्वादिनवकरूपेणाभिहितत्वेसतिनवकातिरिक्तरूपेणानभिहितंद्रव्यंनवकान्यूनंनाप्यधिकमितिसामान्यव्याप्तिमूलकानुमानात्पदार्थीनान्यूनाधिकसंख्याव्यवच्छेदबोधइत्यर्थः। नहिक्लप्तमितिं। अनादिपदतात्पर्यात्मकव्युत्पत्तेः शाब्दबोधएवनत्रतानमानसेआनुमानिकेचातंत्रत्वाच्चविशेषरूपेणाभिधानस्यन्यूनाधिकसंख्याव्यवच्छेदबोधकत्वेव्युत्पत्तिसिद्धत्वान्निर्विरुद्धत्यर्थः। व्याघातानुपपत्तिश्चेति। विभागवाक्येन्यूनत्वाधिकत्वयोरपिमनसानुमानेनवान्यूनाधिकसंख्याव्यवच्छेदबोधसंभवाद्व्याघातानुपपत्तिरित्यर्थः। वस्तुतस्तुन्यूनाधिकसंख्याव्यवच्छेदबोधोनविशेषरूपेणाभिधानाभावेव्याप्यकत्वबोधात्किंतु विभागपरी

सयेवा अन्यथानद्यर्थत्वापातादितिनत्वं। अतएवोक्तंदिमिति। प्रकृते। पदार्थादित्यादि
यत्तुविभागवाक्यानदसंभवात्। एवकारेणाधिकसंख्याव्यवच्छेदत्वाभासंभवात्। असं
भवमेवविवृणोतिनथाहीति। विशेष्यसंगतत्वेति। विशेष्यसंगतेवकारेणैवधनुर्धरत्वे
पार्थान्ययोगोनास्तीत्यादिविधायान्ययोगव्यवच्छेदबोधनादितिभावः। विशेषणवि
शेष्यभावेकामचारात्सत्तैवपदार्थोस्त्यवेवकारस्यविशेष्यसंगतत्वमाशंक्यनवेति।
ज्ञातस्यपदार्थत्वस्यविधेयत्वेनसंभवति। ज्ञातंधर्मिणमुद्दिश्यअज्ञातस्यैवविधा
नादत्रऽक्रमज्ञातस्येतिनत्वंविशेष्यसंगतत्वं। ननुसत्तैवकारार्थोयोगव्यवच्छेदः स
मभिव्याहृतपदार्थतावच्छेदकावच्छिन्ननिष्ठेतरपदार्थतावच्छेदकावच्छिन्ननिरूपित
नादात्म्यसंबंधावच्छिन्नव्यापकत्वपर्यवसितः। स्वपदमेवकारंपरं। शंखःपांडुर
वेत्यादौ पांडुरत्वावच्छिन्नेशंखत्वावच्छिन्ननिरूपितस्यनादात्म्यसंबंधावच्छिन्नव्याप

२०

वसंयोगेसंयोगसमवायित्वमेवचनादृशभेदवत्त्वमीतिनतद्भावबोधः। यावद्द्र
व्यवृत्तीनांनत्वद्वृत्तित्वावच्छिन्नभेदकूटस्थगुणादिव्यक्तावेवेतिनद्रव्यसमवेतत्वाभा
वस्यसंयोगेसंयोगसमवायित्वाभावस्यचनादृशभेदकूटवत्तिबोधोपपत्तिरित्य
र्थः। एवंपृथिव्यामेवगंधइत्यादावपिगंधयावत्पृथिवीवृत्तिभेदकूटवत्समवेतत्वा
भावस्यनादृशभेदकूटवतिगंधसमवायित्वाभावस्यबोधोद्देश्यः। प्रमेयंवा
च्यमेवेत्यादौयावद्व्यक्त्यन्योन्याभावकूटत्वावच्छिन्नप्रतियोगितानिरूपकभावएवअयो
गव्यवच्छेदशब्दार्थोविवक्षितः। अन्यथाप्रमेयंगंधवदेवेत्यपिस्यात्। यावद्व्यक्त्यो
न्याभावकूटमगन्योभयाभावमादायनादृशकूटाभावस्यसर्वत्रप्रमेयेसत्वादतअ
ह। नादृशकूटत्वमिति। नथाचनत्वद्व्यक्त्यन्योन्याभावकूटाभावत्वमेवशक्यतावच्छेदकं

ननुनादशकूटत्वावच्छिन्नप्रतियोगिताकाभावत्वमितिनगौरवमित्यर्थः। इत्थंच
पृथिव्यामेवगंधइत्यादेतन्नक्षतिरेवकूटत्वसमवेतत्वाभावादि--लक्षणयैवे
तिहृदयं। अन्येत्वाहुरित्यसरसस्तु। कूटस्यैकविशिष्टपरत्वरूपतयाविरोध्यवि
शेषणाभावेविभिगमकाभावादनंतविधत्वान्नदृष्टिनाव्याप्यावृत्तिभावकूटत्व
स्यशक्यतावच्छेदकस्यानंत्यमितिशंक्यानंत्यंउन्नानास्तिनि। एकपदार्थद्योधि। ए
कस्मात्पदान्नभिन्नभिन्नराशिष्यांशक्तिलक्षणाभ्यांवोपस्थितान्ययोगव्यवच्छेद
योधि। एकराशीति। एकशक्त्यपस्थापितस्यापितात्पर्यवैलक्षण्यात्समासकृ
राज्ञानमर्थग्रहात्येवेत्यादौ। ज्ञानमर्थग्राहकत्वात्यंताभावात्यंताभाववदिति ४५
बोधसंसर्गानुख्यःप्रयोगइत्यर्थः। अन्येत्विति। शंखःपांडुरएवेत्यादौइतर

विशेषणपांडुरत्वादिघटितात्यंताभावबोधार्थलक्षणेत्यर्थः। उक्तास्त्वसरसस्तु
एकशक्तिविषयस्वस्मिंनेवान्वयस्याव्युत्पन्नत्वे। ग्रंथविस्तरभयादुपरम्यतइति
।शब्दसंक्षेपइत्यर्थः। अर्थवदुक्तस्यनञ्तत्पर्यव्याख्यातत्वादितिभावः। सप्तैवपदार्थो
इतिव्यवस्थापयितुंविचारांगसंशयबीजभूतंविप्रतिपत्तिंदर्शयतिनन्वित्यादि। एव
मन्येपीतिप्रमाणादयोनिग्रहस्थानांताःषोडशपदार्थाःइतिनैयायिकाः। प्रमाण
प्रमातृप्रमेयप्रमाभेदाच्चत्वारएवपदार्थाइतिनव्यकृतः। एवंउनकारसकारत्व
हीनोपरांतस्त्वरइतिविशेषादीश्वरवंउपनीत्यर्थः। नचाचपदार्थाश्चत्वारोऽप्यसंभ
वेत्यादिविप्रतिपत्तिः। तत्प्रयोजनंसंशयमाह। तत्कथमितिसप्तैवपदार्थाइत्येतत्कथ
मित्यर्थः। अयंचसंशयोमध्यस्थएवननुवादिनोः। तयोःस्वस्वाभिमतपदार्थनि

श्चयादिनिभावः। उच्यतइति। सत्तेति। कोटिंव्यवस्थापयितुंवैशेषिकेणोच्यतइत्यर्थः। अनतिरेकादिति। सत्तानतिरेकादित्यर्थः। तत्रशक्तिर्वह्न्यादिस्वरूपमेवतस्येदाहानुकूलत्वात्। सादृश्यंवोपाधिरूपंसामान्यमतोयथायथंद्रव्यगुणादावंतर्भवतीतिवक्ष्यतइतिभावः। शक्तेरनतिरेकादित्यत्रैवाभाकरः प्रत्यवतिष्ठते। अथवह्निरित्यादि। साध्येत्यनिरूपकमादायसिद्धसाधनवारणायदाहानुकूलेति। अदृष्टवदात्मसंयोगमादायतद्वारणायादृष्टेति। ऊष्मस्पर्शमादायतद्वारणायातीन्द्रियेति। काञ्चिकादिनावच्छिन्नदाहकादृष्टमादायतद्वारणायसमवायीति। समवायेनादृश्यधर्मस्यसाध्यत्वलाभाय। तेनदाहकादृष्टसमवायित्वस्यापिकालिकादिनावच्छिन्नत्वेपिनसिद्धसाधनं। अत्रदृष्टांतेअदृष्टात्मकंतादृश्यधर्मादायसाध्यत्वं। पक्षेतुपक्षधर्मतावलात्तादृश्यधर्मःशक्तिरूपःसिध्यतीतिभावः। नचात्मत्वमिति। एतस्यनिश्चिततादशसाध्यवदात्मनिसाध्यव्यापकत्वंपक्षेचसाधनव्यापकत्वंबोध्यं। नन्वत्रसाध्यदाहानुकूलत्वंकारणतावच्छेदकसाधारण्यंप्रयोजकत्वं। परमतेशक्तेर्वह्न्यादिनिष्ठकारणतावच्छेदकत्वात्। तस्याशक्तिमत्त्वेनेदंदाहादिकारणत्वात्। नचायंतेजःपरमाण्वादिनिष्ठोह्यस्पर्शस्यदाहंप्रत्यकारणत्वात्। कारणतानवच्छेदकत्वाच्चनदाहानुकूलत्वमितिनमादायतेजःपरमाण्वादौनसाध्यव्यापकत्वमुपाधेस्तत्स्वरसादाहअदृष्टेचेति। अत्रधर्मित्वमधर्मित्वंदाहकारणतावच्छेदकमादायसाध्यसत्वादात्मत्वोपाधेश्चासत्वात्साध्यव्यापकत्वंबोध्यं। अप्रयोजकत्वेनेति। अनुकूलतर्कविरहेणेत्यर्थः। अनुकूलतर्कमाशंक्यनिषेधतिनवमण्यादीति। तयाचवह्नेर्दी

हजनत्वेपियद्दितादृशधर्मसमवायित्वेनस्यात्तदामण्यादिसमवहितेनापिवह्निना
दाहः स्यादित्यनुकूलतर्कोविरोधीयद्दिति। कुंठनीयेति। स्वप्रयोज्याऽसमत्वेत्यर्थः। वि
मानशक्तेः स्वप्रयोज्याऽसमत्वंनसहकारियुक्तेसहभूतआहनाश्यावेति। ननुमण्यादिस
मवायिविधानकालीनवह्नेरपिजननेपूर्वंदहत्वाद्वितक्षणवह्निसमस्त्वेवेतिमण्या
दिसमवधानेननस्यकुंठनीयत्वंनाश्यत्वंवायुक्तंमनःसमाधानानंतरमाहमण्या
दीतिनत्र। मण्यादिसमवधानरूपे। नचैवमिति। मण्याद्यभावस्यदाहहेतुत्वइत्य
र्थः। उत्तेजकेति। प्रतिबंधकसमानकालीनकार्यार्जकमुत्तेजकंतद्भावसहितस्यत्य
र्थः। प्रतिबंधकत्वंचकारणीभूतभावप्रतियोगित्वंकार्यानुकूलकिंचिद्धर्मविघट
कत्वंचेतिविवेकः। शक्त्यादिहेतुत्वेति। नचावेदंगौरवमुभयोस्तुल्य। शक्तिकल्प

नंनुतवाधिकमितिभावः। लाघवादाहवस्तुनइति। गौरवादिति। मण्याद्यभावस्य
दाहंप्रतिहेतुत्वेरूपादिध्वंसालंकदाहत्वस्यगुरुणःकार्यतावच्छेदकत्वाद्गौरवंविना
नाग्नावह्निप्रत्यक्षहेतुत्वेनवैजात्यस्यलघुनः। कार्यतावच्छेदकत्वाल्लाघवं। नचवैजा
त्यकल्पनायांगौरवं। मण्याद्यभावस्यदाहहेतुत्वपक्षेपिदाहहेतुतावच्छेदकतयाव
ह्निनिष्ठवैजात्यस्यावश्यकत्वादितिभावः। ननुमण्यादिसमवहितसिद्धवह्नेरपिकें
चिदुत्पादितदाहत्वेनविजातीयत्वात्तेनमण्यादिमुक्तेदाहः स्यादतआहस्वमन्येति।
ननुस्वमन्यवह्नित्वेननदाहहेतुत्वंगौरवान्किंनुवैजात्यनैवतथाविजातीयवह्नि
सत्वान्मण्यादिमुक्तेदाहः स्यादेवेत्यतआह। नचादीति। नथाचदाहजनकतावच्छे
दकवैजात्यवाननुक्तरूपवत्वंवह्निः सचमण्यादिमुक्तेनास्तीतिनदाहइतिभावः।

ननुमण्यादिसमवहितासमवहितनृणादिद्वयस्यैकेनदससमवहितनृणादानुत्पत्तौ
नुद्भूतरूपवद्रूपसंयोगेननत्समवहितेपिसत्वाद्दाहःस्यादतआहाक्षवेति।धारणेति
।नृणादौधृतेअक्षुण्णावह्निरपियत्संयोगेनधृताक्षुण्णाभवतितादृशसंयोगेनेत्य
र्थः।ननुमण्यादिसमवधानेजन्यादृष्टस्यप्रतिबंधोयमितिप्रतीतिनियामकस्वरूप
संबंधविशेषणदाहविरोधित्वंवाच्यमितिनकोप्यतिप्रसंगइतिअतआहकिंचेति।
ननुसर्वतआत्मानंगोपायेत्यादिशास्त्रेणामण्यादिसमवधानंविहितमेवेत्यतआहन
वाशुचीति।अशुचिनापिमण्यादिसमवधानस्यक्रियमाणत्वान्नत्रनवादृष्टात्यतिसं
भवः।शुचिनाकर्मकर्तव्यमित्यत्रेनविहितक्रियातस्तुदुत्पत्तौशौचस्यप्रयोजकत्वप्र
तिपादनादितिभावः।निरस्तोपिप्राभाकरःपुनःप्रत्यवतिष्ठतेअथनृणेति।तृणंवि

अत्रेदंबोध्यमिति।वायोःस्पार्शनत्ववारणायमूर्तप्रत्यक्षेत्वावच्छिन्नंप्रत्यक्षद्भूतरूप
त्वेनहेतुत्वव्यवस्थापितेइदंवायोःस्पार्शनत्वापपादकंवक्ष्यमाणमेकदेशिमतंबोध्य
मित्यर्थः।अनुद्भूतस्पर्शत्वद्रव्यस्पार्शत्वेनहेतुत्ववक्ष्यमाणंसंभवति।प्रभादि
स्पार्शनापन्नेरतआहअनुद्भूतस्पर्शसत्वइति।अनुद्भूतरूपासत्वइत्यपिबो
ध्यं।अन्यथाद्रव्यचाक्षुषरूपत्वेनवक्ष्यमाणहेतुत्वानुपपत्तिचक्षुर्घटसंयो
गेनघटादिरिवचक्षुरादेरपिचाक्षुषापन्नेरितिभावः।अन्यथामूर्तप्रत्यक्षत्वा
वच्छिन्नंप्रत्येवरूपत्वंहेतुत्वेअनुद्भूतस्पर्शस्योपगंतृणांप्राचांनयेद्रव्यस्प
र्शनिंप्रतिस्पर्शत्वंहेतुत्वेनसंभवति।प्रभादिस्पार्शनापन्नेरित्यस्वरसादाह
अथेचेति।तटिस्पार्शनोपगमेद्रव्यंस्पार्शनत्वसंयुक्तामहत्वे।भूतस्पर्श
वत्समवायित्वेनहेतुत्वंवक्ष्यमाणंनसंभवतीत्यतोवक्ष्यमिचारादतआह

त्वेति। तादित्त्वसरेणुः। द्रव्येति। द्रव्यमिन्द्रियसमवेतं गुणकर्मादितस्यार्थि
नेऽर्थः। द्रव्यस्याऽनिन्द्रियसन्निकर्षस्यप्रागुक्तत्वाद्द्रव्यान्यति। अभावस्याऽनि
एतत्सन्निकर्षासंभवाद्व्यभिचारवारणायसमवेतति। त्वक्संयुक्तति। त्वक्संयुक्त
समवेतंतस्याःस्पर्शनंस्पर्शनेंद्रियेणयेत्यंतेनसमावायइत्यर्थः। नचद्रव्यमिन्द्र
समवेतस्याऽनित्वंसंयुक्तसमवेतसमावायहेतुरस्तुतंतत्रस्याऽनित्व
वेऽनतिव्याप्यं। द्व्यणुकस्यशब्दादेः स्याऽनापत्तेः। त्वक्संयुक्तपरमाणुसम
वेतद्व्यणुकसमवायस्यतत्रसत्वादितिभावः। ननुद्वितीयक्षणावच्छिन्नघ
टादेस्याऽनित्यात्। तादृशघटादेस्त्वक्संयुक्तमहत्त्वोद्भूतस्पर्शवत्कपालस
मवायस्यतत्रसत्वादतआह द्वितीयक्षणाऽतितथा। हेतुः। द्रव्यस्याऽनित्वादात्व
क्संयोगत्वादिनाहेतुत्वलाघवंमत्वाह अस्तुवेति। द्रव्यस्याऽनित्वादाविति। आ

दिनाद्रव्यचाक्षुषादेः संग्रहः। त्वक्संयोगादिकमिति। आदिनाचक्षुःसंयोगादेः
संग्रहः। उभयथापीति। द्रव्यान्यसमवेतस्याऽनित्वत्वक्संयुक्तसमवेतस्याऽनि
समवायोहेतुरितिपक्षेद्रव्यसमवेतस्याऽनित्वत्वक्संयुक्तस्याऽनित्यसमवायोहेतु
रितिपक्षेचेत्यर्थः। दुर्घटमिति। तथाचवायुस्पर्शादेः स्याऽनापत्तयेवायो
रपि। स्याऽनित्वमुपेयमितिभावः। ननुत्वक्संयुक्तात्मा - दिरपि। अलौकिकवि
षयतासंबंधेनसमायंघटइत्यादिस्याऽनित्वात्तत्समवायस्यचात्मत्वादासत्वा
त्तत्स्याऽनापत्तिरतआहलौकिकविषयतयेति। उपलक्षणत्वविवक्षायाः फ
लमाहमानइति। ननुसन्निकर्षेघटत्वस्याऽनित्यस्योपलक्षणत्वेघटोत्पत्ति
द्वितीयक्षणेघटत्वक्संयोगाभावद्वारेणयाज्ञानाभावाच्चघटविषयकघ
टत्वादिसविकल्पकासंभवेपिघटाविषयकघटत्वादिनिर्विकल्पकनुस्यादेव।

द्रव्यसमवेतस्पार्शनहेतोस्त्वक्संयुक्तसमवेतस्पार्शनसमवायघटत्वीयक्ष
णादौ घटत्वादौ सत्त्वान्नानुपपत्तिरत आह घटाद्यत्पत्तीति। नचैवमिति। वा
योः स्पार्शनत्वइत्यर्थः। एकदेशिनोपपादितंवायोः स्पार्शनत्वंदूषयितुमाह
अवच्छेदकतायाइति। कारणतावच्छेदकतायाव्यासज्यवृत्तित्वापगमेन
दवच्छिन्नमहत्त्वादित्रयस्यानुगतकारणतावच्छेदकत्वोपपत्यामहत्त्वाद्भूतरू
पस्पर्शवत्त्वेन मूर्तप्रत्यक्षत्वावच्छिन्नहेतुत्वोपपत्तिः। अन्यथाकारणता
वच्छेदकभेदात्कार्यकारणभावभेदापत्तिरितिभावः। अवच्छेदकतया
व्यासज्यवृत्तित्वे मानाभावादाह तत्तत्त्वेनेति। तत द्यक्तित्वेनविषयस्य
तत्प्रत्यक्षव्यक्तिंप्रतिहेतुत्वेइत्यर्थः। ननु घटादेरिववायुप्रथादेरपितत्त
द्व्यक्तित्वेनप्रत्यक्षहेतुत्ववाच्यं। तथाचवायुस्पार्शनस्यप्रभावाक्षुषस्य

नानुपपत्तिरतआह तत्तत्त्वेनेति। विवादग्रस्तवायुस्पार्शनादेः स्वीकारेतत्र
विषयस्यतत्तत्त्वेनहेतुहेतुमद्भावानंयप्रसंगादित्यर्थः। ननुवायुप्रभादेर्यदि
नप्रत्यक्षंतरांकथंतज्ज्ञानंस्यादतआहस्पर्शरूपादीति। विलक्षणस्पर्शरूपा
दिप्रत्यक्षानंतरंमयंस्पर्शवायवीयः विलक्षणस्पर्शत्वादित्याद्यनुमानेन
सर्वत्रवायोरनुमितिरेवंप्रभायाअपीतिबोध्यं। ननुव्याप्त्याद्यप्रतिसंधानेन
पिवायुप्रभादिज्ञानस्यजायमानत्वान्नतदनुमितिरूपमतआहस्मृतिर्वेति।
स्पर्शरूपादियद्दोद्भूतसंस्कारवद्ग्राह्यपयुक्तप्रभादेःस्मृतिरित्यर्थः। ननुघटा
देरपिनप्रत्यक्षंकिंनुतदीयरूपस्पर्शप्रत्यक्षानंतरंतस्यानुमितिःस्मृतिर्वेया
सांमतआह घटादेरिति। इयत्ताव्यवहारविषयः परिमाणमितिनिर्व च
नमितिव्याप्रव्याप्तिभ्यांदूषयतिसंख्यात्वादिपरिमांडल्यादेरित्यादिना

द्यणुकादिपरिमाणसंहत्यः। पारिमांडल्यंपरमाणुपरिमाणं। ततेन। परमा
णुत्वस्थापीतिवक्ष्यमाणदूषणात। अतथात्वापत्तेः अपरिमाणत्वापत्तेः पर
ममहत्वमिति। आद्यन्यपकृष्टमहत्ववाधात्परममहत्वंसिध्यतीत्यर्थः। अन्यइत्य
स्वरसाद्भावनंद्वीजंतुप्रत्यक्षान्यथानुपपत्यात्मनिपरममहत्वसिद्धावप्याका
शादौतदनुपपत्तिविरहात्तदसिद्धिरिति। ग्रंथकृत्स्वमतमाह मूर्तप्रत्यक्षएवेति
ननुमूर्तप्रत्यक्षत्वंमहत्त्वेहेतुत्वेद्व्यमानसेविजातीयात्ममनोयोगस्यवद्
तुत्वंवाच्यंतथाचतस्यमनस्यपिसत्वात्तन्मानसापपत्तिः। नचघटचाक्षुषहे
तुचक्षुःसंयोगस्यचक्षुष्यपिसत्वाच्चाक्षुषापत्तिः। तत्राङ्गतरूपविरहेणात
द्चाक्षुषासंभवादित्यतआह आत्मत्वेनेति। नन्वेवमपिचैत्रात्ममात्रस्यमै
त्रात्मन्युत्पत्तिः स्यादतआह तत्तदात्मत्वेनवेति। आत्मादाविति। महत्ववत्त्ववा

द्यादौरूपाभावादि प्रत्यक्षस्यात्यादात्मादावपितत्प्रत्यक्षान्यथानुपपत्यापकृष्ट
महत्ववाधात्परममहत्वसिद्धिरित्यर्थः। ननुक्षणिकत्वंक्षणमात्रावस्थापित्वमत्र
सिद्धंआत्मिकस्तादृशपदार्थानुपगमादतः परिशेषिकंतदाहतत्रक्षणिकत्व
मिति। निरुक्तक्षणिकत्वमपेक्षाबुद्धीश्वरज्ञानेच्छादीनास्तीत्यतआह। इत्यंच
त्यादि। क्षणिकेतरधर्मापेक्षाबुद्धिभिन्नंजन्यरूपाद्यवतदवृत्तिजातिः शब्दत्वज्ञा
नत्वादितद्वृत्तिगुणः शब्दज्ञानादिस्तत्वंक्षणिकगुणवत्वंबोध्यमित्यर्थः। न
चविभ्वितिं। द्यरूपसंबंधनविशेषगुणानांप्रतिसमवायेनस्वाश्रयस
मविभुविशेषगुणाः कारणं। आत्मादिनिष्ठएवचकार्यकारणभावइति
भावः। अत्रनात्यकोटौयोग्यत्वंदेयं। तेनदिष्टादेर्विभुविशेषगुणस्यद्वि
इदंवापेक्षते। ननुविरुक्तक्षणिकत्वस्येश्वरज्ञानादिव्याहतत्वेक्षणिकगुणवत्वंतत्राव्याप्तं
स्यादियतआह

तीयक्षणोत्पन्नज्ञानादिनाननाश्रः। नारककोटौचस्वोत्पत्तिक्षणोत्पन्नत्वमात्रंविवक्षि
तंनतुविशेषगुणत्वमपिव्यर्थत्वात्। उपांशुयजनाश्रयेचरमज्ञानांत्यक्षणादिना
श्रव्यभिचारंचेतिभावः। प्रतियोगितयेतिकार्यतावच्छेदकसंबंधकीर्तनं। एका
धिकरणेत्यादिकारणतावच्छेदकसंबंधकीर्तनं। कारणत्वनाभिमतस्यविशे
षगुणस्यस्वपूर्ववर्तितासंबंधेनव्याधिकरणज्ञानादावपिसत्वान्ननो
क्तत्ववारणायतत्काधिकरण्यावच्छिन्नेतिस्वपूर्ववर्तिताविशेषणं। अन्य
था। ज्ञानादेर्निरुक्तक्षणिकत्वानभ्युपगमे। तद्विनाशेपि। मोक्षामीनिसंयो
गविनाशेपि। नन्वेकज्ञानाद्युत्पत्तिक्षणोयद्यपरज्ञानाद्युत्पादिकसामग्रीस
मवधानेस्यात्तदाद्वितीयक्षणोपरज्ञानाद्युत्पत्तिः स्यान्नेवपूर्वज्ञाननाशः
स्यान्नत्रेवचसमवधानेकिंमानमतआहज्ञानादीति। तथाचक्रमिकचेष्टा

DR. BHAU DAJI

दिविलक्षणकार्यबलादेकज्ञानोत्पत्तिपक्षणेपरज्ञानाद्युत्पादिकसामग्रीस
मवधानंकल्प्यमितिभावः। चेष्टादिक्रमादियत्रादिनाश्रुतसंतानस्थूलकठा
दाभिघातेश्रुतसाधनत्वज्ञानाचिकीर्षाकृतिकंठादिचेष्टातदभिघातश्रुत्पत्ती
नांक्रमोबोध्यः। कार्यतावच्छेदकप्रतिदृष्टयोग्यत्वस्यफलमाह। रागादीति।
वेगेति। अत्रवेगावृत्तीतियोग्यजातेविशेषणंभावनायाअसंग्रहाय। अ
न्यथा। संस्कारत्वादियोग्यजातित्वस्यतत्रापिसत्वेनतत्संग्रहेसंगत्यापत्तेः
तस्याश्चिरस्थापित्वसिद्धांताद्दितिभावः। वक्ष्यमाणविशेषगुणत्वस्यात्रप्रवे
शेगौरवादाह उभयावृत्तिरिति। एतावतापिसंयोगादिवारणसंभवादिति
भावः। ननुस्वपूर्ववर्तित्वंस्वभावभावाधिकरणसमयवर्तित्वंतच्चस्थूलकालभा
दायस्वपूर्वोत्पन्नइवस्वस्मिन्नपिसंभवतीतितद्घटितसंबंधेनस्वस्यापिस्वस्मि

स्मात्स्वनाशकत्वापत्तिरतआह स्वपूर्वेति। तथाचतन्निर्वचनेक्षणारूपस्वमयत्वेय
वप्रवेशान्नोक्तदूषणमितिभावः। चरमज्ञानाद्यनंतरक्षणविशेषगुणात्यादमा
नमात्मावात्तन्नाश्यमभिचारस्यादतआह अन्त्यचरमेति। चरमज्ञाननाश्यात्मभि
चारवारकंमतांतरमाह चरमाज्ञानमिति। शब्दज्ञानादिनाशासाधारणका
र्यकारणभावंदर्शयितुंकल्पांतरमाह यद्वातत्क्षणेति। अत्रतत्क्षणापदेनना
श्यज्ञानाद्यक्षणद्वितीयक्षणएवग्राह्यः। उत्पत्तिक्षणासाधारणक्षणोपा
देनचरमज्ञानादेरुत्पत्तिक्षणोत्पन्ननाशानाश्यत्वापत्तेरक्षणिकत्वापत्तेः। इत्थं
चतत्क्षणोत्पन्ननाशानाश्यंचरमज्ञानंसंस्कारादितद्विनेयोग्यविभुविशे
षगुणाश्चरमज्ञानांसंस्कारादिपूर्वतनएवज्ञानसंस्कारादेस्तन्नाशंप्रतितद्वि
तीयक्षणोत्पन्नस्यतत्तेनसंभवायेनहेतुत्वमित्यात्मनोनिष्क्रएवकार्यकारि

णमावश्यकमर्थः। अत्र। यद्वेतिकल्पीयकार्यतावच्छेदके। नाशानाश्येतीति। तत्क्ष
णोत्पन्ननाशानाश्येतीत्यर्थः। नच ध्वंसीयस्वरूपसंबंधविशेषणायोग्यविभु
विशेषगुणानाशेतद्वितीयक्षणोत्पन्नस्योपांसनाश्यस्वरूपसंबंधेनहेतुत्व
संभवेनाव्यभिचारमावान्नाशानाश्येत्यस्याप्यप्रवेशाल्लाघवमितिवाच्यं। तं
त्रापिसक्रसंबंधेनज्ञानादिनाशकत्वादावप्युत्पादापत्तेः। तद्वितीयक्षणो
त्पन्नज्ञानादेःकालिकादिनातत्रापिसत्त्वादिति। योग्येति। प्राग्वदिति। संस्का
दिनाश्यसंस्कारादेर्वारणायेत्यर्थः। योग्यतिपदंवेगादृत्तिभोग्यजातिमदर्थ
कमित्यर्थः। तत्क्षणोत्पन्ननाशानाश्येसत्रतद्वितीयक्षणोत्पन्नत्वेनसत्रनस्व
त्वघटितोत्पत्तिप्रवेशगौरवमनुगमश्चेत्समयघटकंतत्क्षणोत्पन्नत्वंप्र
कृतोपयोगिलघ्वनुगतंनिर्वक्तितत्क्षणोत्पन्नत्वंवेतिनन्वत्रविशेषणागौव

र्थः। नचसंतस्यगगनादावपितत्वान्तद्वारणार्थत्वेनतत्सार्थक्यमितिवाच्यं। तद्
वारणेपिप्रकृतेक्षतिविरहादियतआहसंयंतमेवेति। नन्वत्रतत्क्षणोत्पन्नत्वं
यदितत्पूर्वक्षणावृत्तित्वंमात्रंतदाश्रयनाशनाश्यरूपसंयोगादेःस्वपूर्वक्षणावृ
त्त्याश्रयनाशनाश्यततयातत्क्षणोत्पन्ननाशनाश्यत्वान्नाशनाश्येसत्येनैवत
द्वारणं। विरोधिगुणानाश्यरूपादेस्तद्वारणेप्रयोजनाभावः। तन्नाशकते
जः संयोगविभागादेस्तद्द्वितीयक्षणापूर्वक्षणावृत्तितयातद्द्वितीयक्षणोत्प
न्नत्वरूपकारणतावच्छेदकाक्रांतेनव्यभिचाराभावात्। तथाचतद्वारकविभु
विशेषपदोपादनंनस्यादिति। चेन्नोपादीयतएवतद्द्वयमपीत्याहकिंतु इति
विशेषतिचेति। ननुस्वजन्यविभागप्रागभावावच्छिन्नक्रियारूपक्षणास्यस्व
त्वघटितत्वाननुगतस्यकार्यकारणतावच्छेदकप्रवेशोतदनुभःस्यादतआ

३

हक्षणश्चेति। ज्ञानेदंचिरस्थापित्वोपपादकंमतंदूषयितुमुपन्यस्यतियत्त्विति।
तत्क्षणोयादि। अत्रक्षत्वमपितत्पदंनाश्यज्ञानादिपरं। कार्यतावच्छेदकेक्षणापद
द्वयमपिउत्पत्तिक्षणपदं। कारणतावच्छेदकेतुयथायथंद्वितीयतृतीयक्ष
णादिपरमितिबोध्यं। तथाचतत्क्षणध्वंसावृत्तिदुर्वांयज्ञानरोद्वादितन्नाश
नाश्यंचरमज्ञानांशंरोद्वादितद्विनोपाग्यविभुविशेषगुणाश्चरमज्ञानांश्य
रोद्वादिपूर्वतनएवज्ञानरोद्वादिस्तंनारोंप्रतितदुत्तरोत्पन्नज्ञानादिस्तत्क्षणो
त्पन्नत्वेनहेतुत्वमिति यर्थः। कार्यादिरिध्वंसीयविनोपणाविनोपः। कारणा
दिरिचरमवाचरणसंबंधः। योग्यविभुविशेषगुणानाश्रयमात्रंचरम
ज्ञानांशंरोद्वादिनाशोपिनचतत्रतत्क्षणोत्पन्नंसमवायेनहेतुःसंभवति।
तदुत्तरकालेज्ञानादुत्पत्तौमानाभावादितितत्रव्यभिचारवारणायतत्क्षणो

ध्वंसावृत्तितत्क्षणावृत्तिनाशानाश्येति गुणविशेषणं। चरमज्ञानादिकृतादृष्टो
पांशोरनोपांश्वज्ञानादिनाशेननाश्यमेवेतितन्नाशस्यतादृशकार्यतावच्छेदकक्रांत
त्वाभावान्नव्यभिचारः। अत्रचरमज्ञानादेस्तादृशानाशानाश्यतयादिक्षणावस्थापि
त्वमेव। नत्वितरज्ञानादिवद्द्विक्षणावस्थापित्वं प्रयोजनानुभवयोरभावादितिबो
ध्यं। एवमितियास्मिन्क्षणे ज्ञानादेर्नाशस्तत्पूर्वक्षणोत्पन्नस्यतत्क्षणोत्पन्नत्वे
नतत्रहेतुत्वेज्ञानादेर्यथानुभवद्द्विक्षणावस्थापित्वंचापिसंभवतीत्यर्थः। प्रा
गुक्तयद्धेतिकल्पमाश्रित्यैवयत्नुमतंदूषयति। तत्क्षणोत्पन्नेति। ननुत्वदुक्तेपि
गुत्तरोत्पत्तिघटिततत्क्षणोत्पन्नत्वप्रवेशात्कथंयुक्तत्वमतआह। तत्तत्क्षणो
त्पन्नत्वस्येति। अपेक्षाबुद्धिनाशासाधारणंकार्यकारणाभावमाश्रित्यनि
षेधतिनचापेक्षेति। तत्रापि। द्विक्षणावस्थापित्वेपि। तादृज्ञानादिद्विक्षणावृ

पित्यभिप्रेतमनुसृत्याहयत्तुक्तमिति। नाशं। तादृज्ञानादिनाशं। कालिकेति।
कालिकावच्छिन्नायास्वप्रतियोग्याधारतातद्वत्। नाश्यत्वाभिमतनाशापरं। तत्तद्घटा
दितत्तदात्मनेत्यर्थः। स्वपदंनाशकारणत्वेनाभिमतनाशापरं। तत्तद्घटा
दृज्ञानिनाशस्थलेनिमित्तसंयोगादिनाशः। द्वितीयादिनाशस्थलेचाद्यज्ञा
दृज्ञानादिनाशस्तत्प्रतियोग्याधारतायाः कालिकेननाश्यत्वात्। समावायावच्छिन्नतत्प्रतियोग्याधारतायाः गगनात्मादावेवस
त्वात्प्रतियोगितयाचतत्रतादृज्ञानादिनाशादुपपत्तेर्व्यभिचारवारणायं
कालिकेवच्छिन्नयाधारताविशेषणं। महाकालादिव्यावृत्तकालिकसंस
बंधावच्छिन्नेतितदर्थः। अन्यथासामान्यतः कालिकसंबंधावच्छिन्नस्य
प्रतियोग्याधारतावत्तादात्म्येननिमित्तपवनसंयोगादिनाशस्यमहाका

नादावपिसत्त्वात्प्रतियोगितयानाद्दृज्ञानादिनाश्यत्वासत्त्वाद्यभिचारस्यदु
र्वारत्वात्। यद्यपिकालिकावच्छिन्नस्वप्रतियोग्याधारतायाएवंसंबंधत्वेदोषाभा
वात्तादात्म्यपर्यंतानुधावनंव्यर्थं। तथाप्याधारतायास्तन्नदाधारादिस्वरूपा
लिकायाअननुगतत्वान्नाद्दृग्धारतोपलक्षितन्नत्वादात्म्यस्यचतन्नद्घटक
टाभावरूपस्यानुगतत्वान्नत्वपर्यंतानुधावनं। एवंकार्यतावच्छेदकसंबंधघटु
तायाःप्रतियोगितायाःस्वाभावविरहात्मत्वादनुगतत्वंबोध्यं। नाशत्वेने
श्यनाश्यनाद्दृज्ञानाद्द्वितीयक्षणोत्पन्ननाश्यत्यादिः। नचेति। प्रतियो
गितयानाशंप्रतिकालिकावच्छिन्नस्वप्रतियोग्याधारतावत्तादात्म्येननाश
श्यहेतुत्वेघटादेरपिद्वितीयक्षणावस्थापित्वापत्तिःघटादिद्वितीयाक्षणोत्प
न्ननाश्यतादृशसंबंधेनतत्रापिसत्त्वादिरित्यर्थः। तन्नाशे। घटादिनाशे

ननुनाद्दृज्ञानादिनाश्यप्रतियोगितयाघटादावप्युत्पत्तापत्तिः। कालिका
वच्छिन्नस्वप्रतियोग्याधारतावत्तादात्म्येननिभिन्नसंयोगादिनाश्यत्वा
पिसत्त्वादित्यतआहतन्नाशेइतिप्रतियोगितासंबंधेनतत्रनाशेतन्नत्व
तियोगिनामपिविनाश्यहेतुत्वान्नकोप्यतिप्रसंगइतिभावः। लाघवाद
व्यगुणादिनाद्याधारणंकार्यकारणभावमाहयदिचेति। अत्रनाद्दृज्ञा
नादेश्चिरस्थापित्वोपगमेनसिद्धांतविरोधस्यदुःपरिहरत्वाद्यादिचेत्युक्तं।
तत्क्षणध्वंसेति। यस्मिन्क्षणेनाद्दृज्ञानादिनाशोत्पत्तिःसएवतत्क्षणनाद्दृ
र्धर्तव्यः। तथाचतत्क्षणध्वंसाद्दृत्तितथातत्क्षणावृत्तियद्दृज्ञानादित
नाशेइत्यर्थः। तादृशनाशेतत्क्षणत्वेनहेतुत्वमयुक्तं। तत्क्षणत्वस्यानुग
तस्याभावादतआहतत्क्षणाप्राक्क्षणावृत्तित्वेनवेति। अत्रतत्क्षणप्राक्

क्षणांशंगयाहिकतयाधृत्वातद्वृत्तित्वावच्छिन्नाभाववत्वेनसर्वेषांतत्क्षणानां
मनुगम इतिभावः। कालिकेति। तथाचयदातत्क्षणध्वंसावृत्तिनाशस्तदात
क्षणास्तत्क्षणाभाक्क्षणावृत्तिवेतिनियमभंगंहेतुंपर्यवसितमितिभा
वः। उक्तंराद्धक्षणिकत्वंव्यवस्थापयितुं मीमांसकमतमालंब्यपूर्ववक्ष्यमा
हनन्विति। सएवायमित्यादि। प्रत्यभिज्ञयापूर्वापरगकारादिव्यक्त्योरैक्य
सिद्धौतच्चैक्यंनित्यत्वंविनानोपपद्यतइतितन्नित्यत्वसिद्धिरियर्थः। ननुस
न्निविनाशरूपविषयानेकत्वातत्प्रतीतिबाहुल्यमुचितःपूर्वापरव्यक्तेस
दरूपप्रत्यभिज्ञाविषयस्यैकत्वात्कथंतद्बाहुल्यमतआह विषयबाहुल्यस्ये
ति। विषयैक्येपिधारावाहिकनानाज्ञानसंभवादितिभावः। अथतारे
ति। तारत्वमदत्तादिजातीनामिथोविरोधात्तारमंदादिभेदेनगकारादेर्ना

नात्मावश्यकमितिसएवायमित्यादिप्रत्यभिज्ञयाकथंतदैक्यसिद्धिरियर्थः।
तदैक्यसिद्धौ। पूर्वापरगकारादिव्यक्त्यैक्यसिद्धौ। उत्पादादिप्रतीतेरिति। उ
त्पन्नोगकारोविनष्टोगकारइत्यादिप्रतीतेगकारादिव्यंजकवायुसंयोगा
धीनत्वादविनाशविषयकत्वमित्यर्थः। प्रयत्नेनताद्बुच्चारयतः। पुंसोवायु
र्नाभेरुत्थितउरसिप्रतिस्खलितःकंठेविवर्तितोमूर्धानमाहत्यपराङ्मुखोव
क्त्रविचरन्नानाविधानताद्बृनभिव्यनक्तीतिमीमांसकसिद्धांतात्। नाना
विधानताद्बृनुत्पादयतीतितार्किकपाठः। उत्पत्तेरिति। स्वाधिकरणक्षणा
वृत्तिभावप्रतियोगिक्षणसंबंधःस्वसमानकालीनपदार्थप्रतियोगि
कध्वंसानाधारसमवायसंबंधोवाउत्पत्तिः। स्वउत्पद्यमानत्वेनाभिमतं
घटादि। आद्यक्षणसंबंधउत्पत्तिरियस्यापिक्षणोआद्यत्वेविवक्षितः

रुक्तार्थएवपर्यायसानादिकृत्यन्तेःस्वलगर्भत्वभावन्नयकं। स्वपदस्यचतदादिरि
नव्यमतविशेषरूपेणावतत्रतत्रग्रन्थे। स्वस्वस्यानुतस्याभावद्वायुसंयोगादिति
षस्वघटित्वतदुत्पत्तगकारादावारोपायोगादित्यर्थः। संयोगादिनिष्ठस्वस्वघ
टितोत्पत्तिज्ञानस्यस्वत्वात्मकविशेषदर्शनदन्यत्वाक्षदारोपत्वंनसंभवतीति
भावः। ननुवायुसंयोगादरखंडोत्पादस्यगकारादावारोपासंभवेपितदी
यसखंडोत्पादस्यारोपस्तुस्यात्। तस्यतद्घटकतावत्पदार्थानांमिथःसंस
र्गाविगाहिज्ञानरूपस्यविशेषदर्शनाप्रतिबध्यत्वादित्यस्वरसादाहकिंच
ति। एतेन। किंत्वाद्यक्तक्षयोन। वह्नादाविति। धूमवान्वन्हेरित्यादिधू
मादिनिरूपितआग्नेयत्वसामग्र्यादिनिष्ठायाः स्वघटितायावद्भावारो
पासंभवेपिव्याप्यघटकतावत्पदार्थानांमिथःसंसर्गाविगाहिभ्रमभव न्

DR BHAU DAJI

निसपिराद्यस्वघटितसखंडोत्पादभ्रमस्तद्घटकतावत्पदार्थानांमिथःसंसर्गा
दाविगाहिज्ञानरूपःसंभवत्येवत्यर्थः। एषःसखंडोत्पादभ्रमः। भक्त्यभेदबुद्धेः।
सएवायंगकारइत्यादिबुद्धेः कुतोनविरोधीत्यतआहसाक्षादिति। द्विविधहि
विरोधिज्ञानं। ग्राह्याभावावगाहितद्ग्राहकधर्मदर्शनंच। तत्रकृतस्वघटि
तस्वंखंडोत्पादभ्रमस्यग्राह्याभावावगाहिज्ञानविधयाव्यावर्तकधर्मदर्श
नविधयावानव्यक्त्यभेदबुद्धिविरोधित्वं। तद्धिपरीभूतसखंडोत्पादस्य
व्यक्तभेदविरहरूपत्वाभावेनसाक्षादविरोधित्वात्। व्यक्तभेदव्यावर्तक
नागृहीतत्वाच्चेतिभावः। वर्णमियत्ववादिनामीमांसकस्यतत्प्रथमस्तका
र्यकारणाभावबाहुल्यगोरवंतदनिसत्ववादिनस्तुतन्नेसाहअपिचेति।
चत्रादिरिति। पत्रचत्राद्यनेकपुरुषाणांचत्रमन्त्रादिककारादिप्रत्यक्षंजा

यतनत्रचत्राद्यनेकपुरुषीयकर्मावच्छिन्नविजातीयविजातीयवायुसंयोगानांका
रणत्वंकल्प्यं। अन्यथातन्महावायुसंयोगस्यचैत्रमैत्रादिककार्यव्यंजकत्वानुपप
त्तेः। तथात्वानेकपुरुषीयचैत्रककारप्रयत्नएवकार्यकारणवाहुल्यं। एवम
नेकपुरुषीयमैत्रादिककारादिप्रयत्नेपिनेद्वाध्यं। एवमनेकपुरुषीयच
त्रमैत्रादिरवकारगकारादिप्रयत्नेपिनेद्वाध्यं। वर्णेनियतत्वादिनस्फचैत्र
मैत्रादिककारादेश्चैत्रमैत्रादावनियतोत्पत्तौतन्नदुपयादकविजातीय
वीजातीयवायुसंगस्यनानकत्रकल्पनंकिंतुचैत्रीयककारोत्पादकस्यच
त्रएवकल्पनंमैत्रीयककारोत्पादकस्यचचैत्रएवेत्यादिरीत्याकार्यकार
णभावाल्पत्वलाघवं। तत्तत्ककारादिप्रत्यक्षेतत्तत्कर्णावच्छिन्नसमवा
यहेतुत्वकल्पनंतूभयमतेपिसमानंचैत्रमैत्रादिनिखिलशब्दप्रत्यक्षेच

त्रमैत्रादिकर्णावच्छिन्नसमवायस्यसन्निकर्षत्वमहेतुतायाउक्तत्वेनापिकल्प
नादितिनिखिलार्थः। शब्दनित्यत्वानित्यत्ववादिनोः ककारांतेणापिगौरवला
घवेदर्शयितुमिदंचेति। व्यंजकत्वंपिककारादिलौकिकप्रयत्नजन्यत्वं। तथा।
जन्यतावच्छेदकं। कोलाहलादाविति। गृहीतागृहीतशब्दत्वंतदवांतरजाति
मच्छब्दसमुदायादावित्यर्थः। आदिनादूरोत्पन्नककारादेः संग्रहः। तत्रापि
कत्वादेरग्रहेपिशब्दत्वादिग्रहसत्वात्। तथाचककारादिलौकिकप्रयत्ने
नलौकिकविषयितयाकत्वादिनानियमेनयत्नसंयोगादर्जन्यतावच्छेदकं
संभवति। शब्दत्वगुणत्वादितत्प्रकारकतत्प्रयत्नसंयोगजन्यतायाः सत्वे
पिलौकिकविषयतयाकत्वादेरसत्वेनन्यूनवृत्तित्वादितिभावः। पृथक्
हेतुत्वं। कत्वादिककारकप्रयत्नहेतुसंयोगव्यावृत्तवैजात्यस्यालिनिमित्त
हेतुत्वं। कत्वादिककारकप्रयत्नहेतुसंयोगव्यावृत्तवैजात्यस्यालिनिमित्त

पवनसंयोगहेतुत्वे। तत्पुरुषीयेति। तत्पुरुषीयश्रावणविषयसमवायस्यतत्पुरु
षीयश्रावणविषयविशेषणतायाश्चककारादौगुणत्वादिखकारादिभेदग्रह
हेतुतत्सर्थः। अतिप्रसंगेति। कदाचित्ककारश्रावणत्वसर्वदैवतत्रगुणत्वा
दिग्रहः स्यादितिसर्थः। वर्णोत्पादकालइति। वर्णोच्चारणोत्तरानंतरोत्पन्नप्रयत्न
वदात्मसंयोगाद्ध्वंगल्लताप्राणानकंठादिरभिहन्यतेतस्मादेवाभिघातात्स
कलनिमित्तपवनसंयोगाच्चहृत्समवायिकंठाद्याकाशसंयोगाच्चनिस्तदनंत
रंवैखर्यात्मकंतन्नदूर्णोत्पादकालेन्युत्पादयुपांशुजपाद्यभ्यांसवतांकंठाद्या
काशसंयोगाद्वर्णोत्पादकाळेध्वन्युत्पत्तेरभावादितिसर्थः। अतएवोक्तंसर्व
त्रैवेति। वैखर्यादिस्वरूपंचोक्तमभियुक्तैः। वैखरीशब्दनिष्पत्तिर्ध्वनिरूपा
तुमध्यमा। पश्यंतीज्ञानरूपाचवाग्विशुद्धापरास्मृतेतिशब्दोत्पत्तिनिरूपा

तनाशंनिरूपयितुमाह। अत्रशब्देति। अत्रशब्दनाशविचारेदीधितकृन्मतमाह
कारणेति। अत्रकारणपदेनयथासंभवंनिमित्तपवनसंयोगआद्यशब्दादि
श्चसगृह्यते। तन्नाशादेवाद्यद्वितीयादिशब्दानांनाशादितिबोध्यं। कार्यश
ब्दादेवसर्वशब्दानांनाशेस्वियाशंकानिराकर्तुमहासशब्देति। इरुपपा
दनादिति। तथाचसर्वत्रकारणनाशादेवशब्दनाशेनानुकार्यशब्दादिति भा
वः। इत्थंच। सर्वशब्दानांकारणनाशेनाश्यत्वेच। तथाच। आद्यशब्दस्यनिमि
त्तपवनसंयोगनाशेनाश्यत्वेच। सामान्यतःसंयोगस्यजनकपूर्वक्रिया
नाशंनंतरक्षणएवंचोत्पन्नक्रियांतरजनितविभागेननाशात्क्षणचतुष्टया
वस्थायित्वं। यत्संयोगस्यतु जनकपूर्वक्रियानाशानंतरक्षणएवनक्रि
यांतरोत्पत्तिस्तस्यादिनमासवर्षादिस्थायित्वमपिसंभवतीयतउक्तमुक्त

र्गतइति। स्पष्टमिति। संप्रदायमतेतुनाशोत्पत्तिद्वितीयक्षणैकत्वादिनिर्विक
ल्पकानंतरंकत्वादिविनिष्टप्रसक्तंकपालादर्विनश्यदवस्थवतिनसमंजसमि
तिभावः। अत्रेति। दीधितिकृन्मतेनिमित्तपवनसंयोगनाशत्वेनवाद्यनाशा
शंप्रतिहेतुता। कार्यतावच्छेदकःसंबंधःप्रतियोगित्वंकारणतावच्छेदकरू
पप्रतियोगिजन्यत्वमवयवेषांमतमित्यर्थः। मतांतरमाहनाशत्वेनेति।
संयोगनाशनाशोभयसाधारणमतत्। कार्यतावच्छेदकंतुनाशत्वा
त्यवसर्वसाधारणमितिभावः। एकेषांमतेश्वरसंघकानायतिएतेनेति।
एतेनेत्यस्यैवार्थस्पष्टयतिफलतइति। तात्पर्यतइत्यर्थः। स्वप्रतियोगीति।
स्वंनाशनाशकारणत्वेनाभिमतोनाशः। सचाद्यनाशोस्खलनिमित्तपव
नसंयोगनाशः। तत्प्रतियोगिजन्यत्वादाद्यनाशस्य। द्वितीयादिनाशो

स्खलचाद्यादिनाशोत्प्रतियोगिजन्यत्वाद्द्वितीयादिनाशस्य। इदंचस्वप्रति
योगिजन्यनाशत्वंनसंयोगादिनाशजन्यतावच्छेदकं। सत्वाननुगमत्वा
द्गौरवाच्च। किंतुसंबंधाननुगमस्यादोषतयालाघवात्प्रतियोगितयाना
शनाशत्वावच्छिन्नंप्रतिस्वप्रतियोगिजन्यत्वंसंबंधेननाशत्वेवहेतुत्वमि
त्युक्तंप्राक्। अतएवदानीमप्युक्तंफलतइति। आद्यनाशोपीतिनाश
त्वेनवहेतुरित्यर्थः। अतएव। फलतःस्वप्रतियोगिजन्यनाशोस्वस्यहे
तुत्वादवं। नचमतद्वयेपीति। निमित्तपवनसंयोगनाशक्षणोविनश्यदव
स्थतत्संयोगादवास्खलनाशाद्यक्षणिकापत्तिस्खलनाशास्वप्रतियोगि
जन्यत्वसंबंधेनतत्राद्यक्षत्वादित्यक्षरार्थः। निमित्तपवनेति। तथाचास्ख
लनिसंबंधेननिमित्तपवनसंयोगस्यप्रथमक्षणसत्वाद्द्वितीयक्षणेवत

नः शब्दोत्पत्तिर्नतु तादृशसंयोगनाशक्षणोत्तरसर्वक्षणोत्तरोत्पत्तिसंबंधेनास्त्वि
दितिभावः। ननुतादृशसंयोगस्योत्पत्तिसंबंधेनशब्दहेतुत्वेतृतीयक्षणोत्तरः
शब्दोत्पत्तिर्नस्यात्। द्वितीयक्षणोत्तरस्यतत्संबंधेनासत्त्वादित्यरुचेराहकार्यसद्
भावेनवेति। कार्यकालवृत्तित्वेनेत्यर्थः। तथाचतादृशसंयोगनाशक्षणोत्तरः
शब्दोत्पत्तिर्नस्यात्तृतीयचतुर्थक्षणादेतुस्यादेवेतिभावः। ननुतादृशसं
योगस्यकार्यसद्भावेनशब्दहेतुत्वेतस्यचतुर्थक्षणएवनाशोत्पत्त्यातृती
यचतुर्थक्षणयोरपिकार्यसद्भावःसंभवतीतितस्यादेकावच्छेदेनसद्
शानानाकाराधेयोत्पत्तिर्दुर्वारेत्यरुचेराहअवच्छेदकतयेति। तथाचनिमित्त
पवनसंयोगनाशक्षणैकदापिनशब्दोत्पत्तिरुत्तरसर्वक्षणोत्पन्नशब्दस्य
तिबंधकस्यसत्त्वादितिभावः। नन्वेकावच्छेदेनसदृशानानाकाराधेयोत्पत्तिः

क्वचिदर्कात्सुधापास्यसादाविष्टेव। नचसर्वत्रतदुत्पत्त्यापत्तिः। तद्देशारिष्टादिशो
षस्यासत्त्वात्। तथाचावच्छेदकतयाभुक्तीयककाराद्योतादृशककाराधेयभावहेतु
तकल्पनेगौरवमतोलाघवंस्वसिद्धांतंचानुसरन्याहवस्तुतइति। नन्वि। शब्द इ
त्यादिनाशांशेतथात्वंस्वीकृतमथस्तात्। अतएव। वस्तुइत्यादिनोक्तकार्यभेदकार
णाभावाभ्युपगमादेव। नशब्दस्येति। निमित्तपवनसंयोगनाशक्षणोत्प
न्नशब्दस्यस्वीकारेपिनतस्यक्षणिकत्वं। तन्नाशस्यकालिकावच्छिन्नस्वप्रति
योग्याधारतावत्तादात्म्येनतत्रशब्दसत्त्वात्। तथाचतद्वितीयक्षणोत्पन्नना
शेनैवतन्नाशइतिभावः। नवासस्यादीति। विनश्यदवस्थस्यस्यादीत्यर्थः।
आदिनानुग्रहपरिग्रहः। तथाचविनश्यदवस्थस्यस्यादिक्षणोत्पन्नसंस्कारस्वी
कारेपिनतस्यक्षणिकत्वं। तत्स्यादिनाशस्यकालिकावच्छिन्नस्वप्रतियोगी

त्वादिनिरुक्तसंबंधेनतत्रसंस्कारसत्वात्। तथाचकालांतरेदृत्पन्नस्मरयादिनाकि
चन्नाशनेवरातस्यनाशइतिभावः। अव्याप्यवृत्तित्वंनिर्वक्तिवैशिष्ट्यादि। मतां
तरमाहअवच्छिन्नवृत्तित्वमिति। देशावच्छिन्नवृत्तिकत्वमित्यर्थः। तेनकालव
च्छिन्नवृत्तिकत्वस्यपृथिवीपरमाणुरूपादौसत्वेपिनातिव्याप्तिः। किंचिदि
त्यस्वरसोत्पावनंतद्बीजंतुराद्दृज्ञानाद्यवच्छेदकेमृदंगशरीरादावच्छेदकत्व
नस्वरूपसंबंधविशेषरूपस्यलघुधर्मस्यवस्तीकारान्नकिंचवच्छेद्यान्यूना
नातिरिक्तवृत्तित्वंतत्रस्वरूपविवेकेचातिगौरवमिति। वनवनावच्छिन्नन
भसि। शिरसि। शिरोवच्छिन्नात्मनि। शरीरे। शरीरावच्छिन्नात्मनि। नचचे
ष्टेति। चेष्टात्रशरीरक्रियाथतदनुरोधान्नजन्यजनकप्रयत्नस्यशरीराव
च्छिन्नवृत्तिकत्वंतदनुरोधाच्चतज्जनज्ञानेच्छयोस्तदवच्छिन्नवृत्तिकत्वमिति

तयोरव्याप्यवृत्तित्वनचेत्यक्षरार्थः। समूहालंबनेति। विशांसंशुल्वयस्तनचे
ष्टोपादनमिसाकारज्ञानस्यविंशतिगुलिषुतन्नचेष्टासवत्सिसाकारज्ञानाश्च
विंशतिचेष्टाजनकविंशांशकशुल्यावच्छेदनविंशतिप्रयत्नजनकत्वमस्तीतिज्ञानेच्छ
योचेष्टाजनकप्रयत्नसमानदेशत्वानुपपत्तेरित्यर्थः। एवंकामिनीति। काय
व्यूहस्थलेएकशरीरावच्छेदनकामिनीजिज्ञासायाविरोधन्यायःसत्वेप्यन्यश
रीरावच्छेदेनानुमितिसुत्पन्नेतदभावोपिबाध्यइत्यर्थः। प्रलये। महाप्रलये।
खंडप्रलयेत्विमस्तदनुरोधेनपार्थिवपरिमाणोरूपस्वीकारादितिभावः।
द्रव्यवृत्त्यभावप्रयुक्तेआद्यायाएवहेतुत्वेविनिगकाभावादाह घटादावीति।
निरुक्तेति। चक्षुःसंयुक्तमहत्त्ववत्कपालसमवेतविशेषणतारूपसन्निक
र्षेपीत्यर्थः। प्रलयकालीनपार्थिवपरमाणुरूत्पत्तिकालीनघटश्चतदारु

पादिसामान्याभाववान्नदारूपादिमत्त्वेनोपलभ्यमानत्वादिसकारमनुमा
नमाशंक्यनिषेधतिनाप्यनुमानमिति। प्राचीमतंदूषयितुंनव्यमत मुपन्यस्य
ति। नव्यास्त्विति। अन्वपितेति। तत्रादिपदंरसत्वाप्रतियोगिनोरूपादेरन्व
यितावच्छेदकावच्छिन्नप्रतियोगिताकसंसर्गोवान्वयस्यव्युत्पत्तिसिद्ध
त्वादन्यथारूपवत्यपियत्किंचिद्रूपाभावसत्वेनरूपनास्तीतिव्यवहारस्यदु
र्वारत्वादितिभावः। तथा। रूपत्वावच्छिन्नप्रतियोगिताको। तयोः सामान्य
धर्मावच्छिन्नप्रतियोगिताकत्वानंगीकारादितिभावः। नन्वनंगीकारोनि
र्युक्तिकइत्यतआहसंभवतोवेति। ननुयावद्रूपप्रतियोगिकसंसर्गाभवत्वेन
प्रागभावादिरत्वनियुक्तव्यवहारविषयोननुरूपसामान्याभावइत्यरुचे
राहकिंचेति। ननुनीलपीताद्याधारध्येयविन्यव्याप्यवृत्तिनीलपीतादिसत्वा

स्वकालावच्छेदेनस्वाधिकरणवृत्त्यंतराभावप्रतियोगित्वस्यैकदेशावृत्तित्वस्यनादृ
श्यनीलादावतिव्याप्तितादवस्थ्यमतआहचित्रेति। नन्वेकदेशावृत्तिर्विशेषगुण
वत्तमीश्वरस्यापतंतज्ज्ञानादेर्व्यापकत्वात्तदनआहईश्वरेति। द्रव्यसाधर्म्यनि
रूप्यंहिप्यावधानत्वंगुणसाधर्म्यंनिरूपणाप्रतिजानीतिअथगुणानामि
ति। मूर्तगुणत्वस्यसंख्यादावपिसत्वादतिव्याप्तिरतआहतच्चामूर्तेति। ननु
भावनास्थितिस्थापकजातीयस्यैकस्याप्यप्रत्यक्षात्तत्रसंस्कारत्वजाति
सद्भावेमानाभावः। नचवेगादित्रयेपिकार्यकारणतावच्छेदकतयाजाती
तिसिद्धिरितिवाच्यं। चित्रयसाधारणसंस्कारत्वेनैकस्याप्यकार्यत्वादकार
णत्वाच्च। एवंचप्रत्यक्षसिद्धवेगत्वभावनासंस्कारत्वं। नचैवंगुणविभागः प
रिदृश्यतिधास्यादितिवाच्यं। स्वकारणासजातीयस्वविजातीयकार्यजनक

त्स्यैवगादन्यतमत्वस्यवासंस्कारत्वस्यवेगादिनिष्ठगुणाविशेषाधित्वांगी
कारात्। इत्थंचामूर्तगुणावृत्तिगुणत्वव्याप्यजातिः सांख्यात्वादिशब्दत्वादिवद्वक्त
व्यमेवतच्छून्यगुणत्वस्यवेगस्थितिस्थापकयोः सत्वनसंग्रहसंभवान्संस्कारत्व
न्यतिजातिविशेषणांन्यूनमतआहवेगास्थितिस्थापकेति। अमूर्तगुणत्वं
ख्यादावप्यस्तीत्यतिव्याप्तिरतआहतच्चमूर्तेति। अत्रापिसंस्कारत्वान्यतिजा
तिविशेषणांभावनासंग्रहायउभयगुणत्वं। मतीमूर्तगुणत्वं। उभयगुण
त्वस्यैकत्वपरिमाणादावव्याप्तिराहतच्चकालेति। एवंदिगीति। दिग्वृत्तिरति
गुणत्वव्याप्यजातिमत्वमपिलक्षणार्थंविनिगमनाविरहाद्ध्यइत्यर्थः।
अनेकाश्रितत्वघटादावतिव्याप्यमतआहतच्चस्वाश्रयेति। स्वंलक्ष्यत्वनाश्रि
मतंसंयोगादिस्तदाश्रयप्रत्येकव्यक्तिमादायलक्षणसमन्वयइतिबोध्यं।

गुणत्वनिवेशान्नघटादावतिव्याप्तिः। लाघवादाहनानेकत्वेति। एकैकाश्रितत्वं
द्वित्वादावतिव्याप्तमनेकाश्रितस्यापेकाश्रितत्वाविरोधादतआहतच्चस्वाश्र
येति। तत्तद्रूपरसाद्याश्रयेतत्तद्व्यक्त्यन्योन्याभावव्यावव्यापकायंतराभावप्रति
योगित्वस्यतत्तद्रूपरसादौसत्वाल्लक्ष्यासंगतिः। नचेदद्वित्वादावितिनाति
व्याप्तिः। गुणत्वनिवेशाच्चनविशेषादावतिव्याप्तिरितिभावः। लाघवादाह
स्वाश्रयेतिद्वितीयं। अत्रव्यापकत्वाप्रवेशाल्लाघवमितिभावः। विशेषगुणत्व
यादिसंख्यादिसामान्यगुणाभिन्नगुणत्वंतदान्योन्याश्रयः। विशेषगुणाभि
न्नगुणत्वस्यैवसामान्यगुणत्वस्याग्रेवक्ष्यमाणत्वादित्यतआह। नचभाव
नेति। भावनाभिन्नंयद्वायुवृत्तिवृत्तेः स्पर्शवत्त्वश्चधर्मस्यसमवायितदन्य
त्वंतिगुरुत्वालंजेद्रव्यत्वान्यगुणत्वमित्यर्थः। अत्रवायुवृत्तिस्पर्शादिवि

स्त्रश्च धर्मः संख्यात्वादिरेवत्ववधिः। नित्यानेकसमवेततरूपजात्यत्वप्रवेशेनो
क्तप्रयोजनाभावाच्च धर्मत्वेनैवतदुपादानं। अजलद्रवत्वं। नैमित्तिकद्रवत्वं।
नैमित्तिकद्रवत्वान्यतिक्तेगुरुतरनैमित्तकत्वप्रवेशाद्गौरवंस्यादितितथान
क्तमितिभावः। संख्यादिनवकवारणाय। संख्यापरिमाणपृथक्त्वसंयोग
विभागपरत्वापरत्ववेगास्थितिस्थापकवारणाय। तत्रसंयते। असंभववार
णाय। वायुवृत्तिवृत्तिसत्तागुणत्वमादायतादृशधर्मसमवायित्स्यैवरूपा
दौसत्वेनतदन्यत्वाभावदसंभववारणाय। ननुसत्तागुणत्वभिन्नत्वेयवध
र्मविशेषणंवाच्यं। तावतापिसंभववारणसंभवात्किंस्पर्शवृत्तीतिविशे
षनेणतआहस्पर्शसंग्रहायचेति। वायुवृत्तिवृत्तिस्पर्शत्वमादायतादृश
धर्मसमवायित्स्यैवस्पर्शसत्वेनतदन्यत्वाभावाद्व्याप्तिवारणायेत्यर्थः।

दृशंचस्पर्शवृत्तित्वेननैवासंभवस्यापिवारसंभवात्सत्तागुणत्वभिन्नत्वेतिनक्त
तमित्यर्थः। भावनासंग्रहायेति। वायुवृत्तिस्पर्शवृत्तिधर्मसंस्कारत्वमादाय
तादृशधर्मसमवायित्स्यैवभावनायांसत्त्वेनतदन्यत्वाभावाद्व्याप्तिवारणाय
भिन्नातमित्यर्थः। इदंचभावनाभिन्नंयद्वायुवृत्तिवृत्तिस्पर्शवृत्तिधर्मसमवा
यिसंख्यादिप्रागुक्तंनवकमेनतदन्यत्वस्यभावनायामपिसत्त्वान्नाव्याप्तिरि
तिभावः। अस्मत्पितामहचरणास्तुस्वाश्रयसमानाधिकरणद्रव्यविभाज
कोपाध्यसंतानभावसमानाधिकरणगुणावृत्तिगुणत्वव्याप्यजातिमत्वंवि
शेषगुणत्वंस्वंविशेषगुणत्वप्रयोजिकाजातिः। साचगंधस्नेहादिषुगं
धत्वस्नेहत्वादित्वंरव। रूपरसस्पर्शेषुतुरूपत्वाद्यवांतरजातिर्नतुरूपत्वादिस्त
द्वतारूपादेःपृथिवीजलाद्यनेकविजायद्रव्यवृत्तित्वेनविशेषगुणत्वासंभवात्।

तथाचपार्थिवरूपेविशेषगुणत्वंप्रयोजकं नीलत्वपीतत्वादि। आप्यरसेचाव्यक्तम
धुरत्वं। तस्यापिजातित्वात्। एवंपार्थिवावयवीयानुष्णस्पर्शीतस्पर्शीयानुभव
सिद्धंतत्तद्द्रव्यत्वंतथा। आप्यस्पर्शीद्रवीतत्वतेजस्पर्शीचाप्यत्वंइत्थंविशेषगुणत्वं
प्रयोजकजातिंतांतांस्वाश्रयानादायतत्तत्तल्लक्षणसमन्वयोबोध्यः। यथा
नीलत्वपीतत्वाद्याश्रयसमानाधिकरणद्रव्यविभाजकोपाधिपृथिवीत्वतदसं
ताभावसमानाधिकरणगुणाजलरूपादिः। संख्यापरिमाणादिः सामान्य
गुणश्चतदवृत्तिगुणत्वव्याप्यजातिनीलत्वपीतत्वादिरवतद्वत्स्पनीलपीता
दादीसत्वात्समन्वयः। एवमेवपार्थिवरसस्पर्शीयार्जलादिरूपरससंर्शीषुच
तल्लक्षणसमन्वयः। गंधस्नेहद्राद्दिषुगंधत्वस्नेहत्वादिकमादायवसांसिद्धं
कद्रवत्वभावनात्वमादायसमन्वयः। गुणत्वव्याप्यसंख्यत्वादिमतिसंख्या

दावतिव्याप्तिवारणायअवृत्यंतंजातिविशेषणं। संख्यात्वादिकंचनतादृशगु
णावृत्तीतिनातिव्याप्तिः। तादृशगुणावृत्तिघटत्वादिमतिघटादावतिव्याप्ति
वारणायगुणत्वव्याप्यतिजातिविशेषणंघटत्वादिकंचनगुणत्वव्याप्यमि
तिनातिव्याप्तिः। यद्यपिपार्थिवतेजसद्रवत्वमात्रनिष्ठतत्तद्द्रजालमपिता
दृशगुणावृत्तिगुणत्वव्याप्यजातिरितितद्दीतत्रातिव्याप्तिस्तथापित
त्तद्द्रत्वमपिजातिविशेषणंकर्तव्यमितिनदोषः। वस्तुतस्तुभूजलगुरु
त्वयार्मूर्तजोद्रवत्वयोश्चवजात्यप्रमाणाभावोनतत्रातिव्याप्तिरंकसाहः
बाह्यकेंद्रियग्राह्यत्वंपरमाणुगंधादावव्याप्तमतआह तच्चबहिरिंद्रिय
ति। अत्रबहिरिंद्रियद्वयावद्यत्वंबहिरिंद्रियद्वयजन्यलौकिकप्रत्यक्षाविष
यत्वं। तनराद्दत्वादेर्बहिरिंद्रियद्वयजन्यालौकिकप्रत्यक्षत्वविषयत्वेपिनासं

भवः। एवं बहिरिंद्रियवेद्यत्वमपि बहिरिंद्रियजन्यलौकिकप्रत्यक्षविषयत्वं। तेन
नबहिरिंद्रियजन्यालौकिकप्रत्यक्षविषयज्ञानत्वादिमतिनातिव्याप्तिः। अंतरिं
द्रियवेद्यगुणत्वसाक्षाद्व्याप्यज्ञानत्वादिजातिमतिज्ञानादावतिव्याप्तिवारणा
यबहिरिंद्रियवेद्यत्वबहिः पदं। बहिरिंद्रियवेद्यसंयोगत्वातादृग्जातिमति
संयोगादावतिव्याप्तिवारणायबहिरिंद्रियद्वयावेद्यतिजातिविशेषणंसंया
गादेस्तुबहिरिंद्रियद्वयवेद्यत्वान्ननिरासः। रूपत्वस्पर्शादिस्तुबहिरिंद्रियत्रान्न
त्वगादिमात्रवेद्यगुणत्वसाक्षाद्व्याप्यजातित्वाच्च तस्यस्पर्शादिपंचकेलक्षणास
गतिः। बहिरिंद्रियद्वयावेद्येत्रचबहिः पदंस्वरूपकीर्तनंइंद्रियद्वयावेद्यत्व
नेनसंयोगत्वादिनिरासप्रवाहितिबाध्यं। चक्षुरादिमात्रेति। मिलितोत्प
न्नतरद्वयादिदृत्तिरित्यादिगतवेजात्यस्यचक्षुरादिमात्रग्राह्यत्वान्नदृत्तिरि

तादावतिव्याप्तिवारणायसाक्षात्पदोपादनमित्यर्थः। तथाचतादृग्वेजात्यस्य
गुणत्वव्याप्यत्वेपितत्साक्षाद्व्याप्यत्वाभावान्नतत्रापिव्याप्तिव्याप्तिरितिभावः।
इंद्रियग्राह्यत्वंपरमाणुसंख्यादावव्याप्तमतिव्याप्तंचघटादावियत आह
तच्चचाक्षुषेति। इंद्रियसन्निकर्षेसतिप्रायःप्रथमतोनिर्विकल्पकमेवजायते
तोनिर्विकल्पकविषयत्वात्गुणत्वव्याप्यजातित्वाच्चतदादायसंख्यादौल
क्षणसंगतिरंतःकरणग्राह्यंचनिर्विकल्पकजीवन्मनोनियतयोरभ्यासमासा
दौचातिव्याप्तमतआह तच्चप्रत्यक्षत्वेति। अतींद्रियत्वंनिर्विकल्पकादावति
व्याप्तमतआह तच्चलौकिकप्रत्यक्षेति। गुणेसाक्षाद्व्याप्यत्वंगुणत्वव्याप्या
व्याप्यत्वेसतिगुणत्वव्याप्यत्वंतथाचभावनास्थितिस्थापकयोरभ्यासस्तद्द
त्तिगुणत्वसाक्षाद्व्याप्यसंस्कारत्वसंवेगमादायलौकिकप्रत्यक्षविषयत्व

सैव सत्वादतः प्रकृतोपयोगिलघुतन्निर्वचनमाह तत्वं चेति। संस्कारश्चेति। संस्कारश्चान्यागुणत्वव्याप्यजातिरूपत्वरसत्वादिस्तद्व्याप्यत्वसतिगुणवृत्तित्वगुणत्वसाक्षाद्व्याप्यत्वगुरुत्वधर्मत्वाधर्मत्वद्रवत्वभावनात्वस्थितिस्थापकत्वयोरप्यस्तीतिनभावनास्थितिस्थापकयोरव्याप्तिरितिभावः। मिथ्याज्ञानवासनाश्रेयश्चुभाशुभकर्मणादृष्टोत्पत्तेरभावाददृष्टोत्पत्तिंप्रतिमिथ्याज्ञानवासनात्वेनहेतुत्वमावश्यकमितितज्जन्यतावच्छेदकतयादृष्टत्वजातिमिद्धिरित्याशयेनाह मिथ्याज्ञानेति। आत्मनिशरीराद्यभेदबुद्धिर्मिथ्याज्ञानंतज्ज्ञानिनदृष्टसंस्कारोवासनेत्यर्थः। अदृष्टोत्पत्तिंप्रतिमिथ्याज्ञानत्वेनैवहेतुत्वेनिर्द्वारणायांगंगाजलस्पर्शादिनादृष्टोत्पत्तिर्नस्यादतोमिथ्याज्ञानजवासनात्वेनतदुक्तं। वस्तुतश्चतुर्विंशतिधागुणाविभागव्याघातान्नादृष्टत्वजातिरिति

त्वपदंलक्ष्यपरं। तथात्वस्वाश्रयसमवायिभिन्नसमवेतासमवायिकारणाकंकपालाकाशसंयोगजन्यघटाकाशसंयोगादिकमेवतदन्यत्वेसतिस्वाश्रयसमवायिसमवेतासमवायिकारणाकत्वमपाकजरूपादौसर्वत्राप्यस्तीत्यभिप्रायेणालक्ष्येलक्षणांसंगमयतिमवतिहीति। सयंतनूघटकेति। तथात्वस्वाश्रयसमवायिभिन्नसमवेतासमवायिकारणाकप्रागुक्तघटाकाशसंयोगादिकमेवतदन्यत्वस्वबुध्यादौमत्वादतिव्याप्तिरुद्धारणार्थंविशेष्यभागइत्यर्थः। बुध्यादौस्वाश्रयसमवायिनोप्रसिध्याविशेष्यासत्वान्निरासइतिभावः। बुध्यादीत्युपलक्षणं। पाकजरूपादावपिसयंतत्वादतिव्याप्तिवारणायविशेष्यभागोवोध्यः। तत्रापिस्वाश्रयपरमाणुसमवायिनोप्रसिध्याविशेष्यासत्वान्निरासइति। यदिघटादावपिपाकजरूपादिद्वारासयंतेनैवतद्वार

णं। तद्रूपाद्याश्रयघटसमवायिकपालाग्निसंतेजः समवेतपाकासमवायिका
रणाकस्यैवतत्रसत्वेनसत्यंताभावादितिबोध्यं। अकारणगुणपूर्वकत्वंयदिवि
कारणगुणपूर्वकत्वाधर्मत्वमधर्मत्वंचादायैवतदुभयत्रलक्षणसंगतिरद्दे
ष्टत्वेचधर्माधर्मान्यतरत्वंतदेवमिथ्याज्ञानवासनाजन्यतावच्छेदकंतादृशावि
सनायाविहितक्रियासहकारेणाधर्मजनकत्वंनिषिद्धक्रियासहकारेणाधर्म
जनकत्वमिनकश्चिद्दोषइतिबोध्यं। तननिति। अपाकजपदार्थविवेचनेजन्यत्वनि
वेशेननित्यवर्गस्यजलपरमाणुरूपादेरप्यव्याप्तिरसिद्धाश्रयः। तस्याप्यि
ष्टत्वेकारणगुणपूर्वकत्वस्यतत्राव्याप्त्यापत्तेरितिभावः। कर्मजवेगकारण
गुणपूर्वकत्वाभावादाहवेगोत्रेति। वेगवत्कपालारब्धघटवेगोयाह्यइत्यर्थः।
कारणगुणपूर्वकत्वंयदिकथंचित्कारणगुणाजन्यत्वंतदापाकजरूपादौकपा

लाकाशसंयोगजघटाकाशसंयोगादौचातिव्याप्तिः। विलक्षणतेजःसंयोगरू
पपाकस्यपाकजरूपादिसमवायिपरमाणुसमवेतत्वात्। एवंकपालाकाशसं
योगस्यापिघटाकाशसंयोगसमवाय्याकाशसमवेतत्वादतस्तन्निर्वर्त्यतच्च
स्वाश्रयेति। अत्रचथमस्वपदंसंयंतघटकान्योन्याभावव्रतियोगिपरं। द्वितीय
यंभावस्तदगौरवमतस्तदन्यथानिर्वर्त्यतच्चविभिति। सुखदुःखेखल्वदृष्टप्र
यत्नानांस्वासमानजातीयारंभकत्वमुक्तंतदूषयितुंनव्यमतमुपन्यस्यतिसुख
दुःखयोरितितज्ज्ञानस्य। अनागतसुखदुःखेज्ञानस्य। सत्वात्। इच्छादिजनकत्वा
त्। नव्यमतमाश्रित्यादृसंस्कारोप्यावश्यकइति। भावनायाअपिसजातीयप्र
वनाजनकत्वमस्त्येवेतिसंकल्पेनान्विति। तत्र। यदुत्तरभावनायां। तदुक्तमिति
अनुमानदीधितावितिशेषः। तत्र। दृढभावनायां। स्मृतित्वेनैवेतिसमवा

येनदृढभावनांप्रतिस्वजन्यसंस्कारसमवायोभयान्यतरसंबंधेनस्मृतिहेतुत्वमित्यर्थः। स्वंस्मृतिः। आद्यस्मृत्यति। स्वद्वितीयक्षणजनितसं
स्कारद्वयस्मृत्यास्वनाद्यक्षणेदृढसंस्कारोत्पत्तिः स्यात्। तदुभयान्यसंबंधेनतत्स्मृ
तेः सत्वादितिभावः स्वस्यद्वितीयेति। स्वंआद्यस्मृतिः स्वद्वितीयक्षणोत्पन्नापरस्मृ
तिरुभाभ्यामेकसंस्कारजन्याभ्यामित्यर्थः। इच्छाविशेषसहकृतादेकस्मादपिस
स्कारात्क्वचित्क्रमेणास्मृतिद्वयसंभवादिति। नन्वेकसंस्कारात्स्मृतिद्वयंवादिनोना
भिमतंमतः प्रकारांतरेणदूषणमाहदंडविनिष्टेति। दृढसंस्कारेति। स्वस्वद्वितीं
यक्षणोत्पन्नस्मृतिस्थलेदंडविनिष्टचैत्रस्मृतेःकुंडलविनिष्टचैत्रस्मृतिसाहि
त्यस्थलेचस्वजन्यसंस्कारजन्यस्मृतिसंबंधेनस्मृतेरसत्वादृढसंस्कारानुत्पत्ति
प्रसंगइतिभावः। शंकितमुपसंहरतितस्यादिति। स्वप्रयोज्येति। स्वंआद्यादि

स्मृतिस्तस्ययोज्यस्मृतिसंबंधेनस्मृतेदृढभावनांप्रतिहेतुतेत्यर्थः। एवंसंस्कारजन्य
स्मृतिद्वयस्थलेचाद्यस्मृतेर्द्वितीयक्षणोत्पन्नस्मृतिंप्रतिविशेषणंज्ञानत्वेनको
लनयावाप्रयोजकत्वमस्येवेति। नानुपपत्तिः। इत्थंचपटुनरभावनांप्रतीयो
जकसंबंधकोटौस्मृतिजन्यभावनाप्रवेशात्तस्याअपिपटुनरभावनाजनक
त्वमितिपूर्वपक्षेइत्यइतिबोध्यं। पाथमिकसंस्कारादेवपुनःपुनःस्मरणोसंति
सहकारिवशात्प्रकटितिसम्यक्पपत्तिरित्याद्यायेनसिद्धांतीपूर्वपक्षापरिहृ
रतिनप्रकटितीति। वैजात्यंतरेति। भावनानिष्टदार्घनामकवैजात्येमतांतरमाह
स्मरणेत्विति। अत्रमतेभावनायांरागकालनाश्यत्वमेवदृढत्वं। नन्वाश्रयत्वमे
वचादृढत्वंचिंतात्वमननमितिविवेकः। इच्छा। इच्छादिकमिति। फलेच्छातदुपा
यच्छाफलद्वेषसदुपायत्वेषंजनयतीत्यर्थः। भ्रूकंपादीति। आदिनापर्वतादि

चलनसंग्रहः। भ्रूकंपादिरप्यनिष्टसूचकतयाहृविधेन धर्मा धर्महेतुकत्वेनानुप
पन्नमितिभावः। ननति। निमित्तकारणान्यत्वनिवेशनपाकजरूपादीनिभिन्नमूल
संयोग्यसंयोगादेव्युदासउचितइत्यर्थः। अन्यथातत्रासमवायिकारणत्व
सत्वेनलक्ष्यदिरूपनुल्यस्पर्शीतिकरणमनुचितमेवस्यादितिभावः। ननुनिमि
त्तकारणान्यत्वमतिप्रसमवायिकारणावृत्तिगुणत्वादिव्याप्यजातिमत्व
तत्वंवाच्यं। तेनांशावयविरूपादीनाव्याप्तिरित्यत्वरसादीषांतरमाहकिंचे
ति। आत्मधर्मेति। आत्मधर्मेच्छानादिस्तदितरजीवनपुष्पादिभिन्नमे
काश्रितंचयत्कार्यंशब्दादितन्निमित्तकारणांसंयोगाद्यवृत्तिरसमवायिका
रणाद्यन्निः। पृथक्त्वान्याप्रयक्ष्यजातिःरूपत्वरसत्वादिस्तद्व्यावृत्तस्व
र्मः। रूपादिसंग्रहायआत्मधर्मेतरद्रवसंग्रहायजीवनपुष्पादिभिन्नस्य

स्नेहादिसंग्रहायआत्मधर्मान्नं एकाश्रितंचात्रकार्यमुपात्तं। अन्यत्सर्वमूलए
वमुक्तमितिबाधं। प्रसंगादसमवायिकारणत्वविवेचनायाह। अथकिमत्रे
ति। नकार्यकार्थेति। तंतुसंयोगादेः पटादिलक्षणकार्येणसहकार्थेतंतोत्र
त्यासत्तिसत्वादसमवायित्वमित्यर्थः। तंतुरिति। तंतुरूपादेः पटरूपादिकंप्रति
कार्यकार्थप्रत्यासत्यभावादित्यर्थः। नापिकारणेति। तंतुरूपादेः पटरूपादि
कंप्रतिकारणापटनसहकार्थतंतोप्रत्यासत्तिसत्वादसमवायित्वंतुल्यमित्य
र्थः। तुरीतंतुसंयोगादेश्चेति। अत्रेपमवधेयंतंतुसंयोगस्यपटासमवा
यिकारणत्वंनसंयोगत्वेनतंतुसंयोगत्वेनवा। तंतुघटसंयोगेपितद्रूप
सत्वेनातिप्रसंगात्। किंतुवैजात्येनतथाचतुरीतंतुसंयोगस्यापितेनैव
पटहेतुत्वंनमुतद्विरूपवैजात्येनतुरीतंतुसंयोगत्वेनवागौरवात्। एवंचतस्मा

प्यसमवायित्वदोषाभावात्कथमितिव्याप्तिः। नचतस्यतत्तन्नाशात्पटनाशाप
त्तिरसमवायिनाश्यद्रव्यनाशहेतुतायाःसर्वसिद्धत्वादितिवाच्यं। अवयवद्र
व्यसंयोगनाश्यस्यद्रव्यनाशहेतुतायाअभ्युपगमात्। नचैवंकारणातावच्छे
दकगौरवं। अवयवद्रव्यसंयोगनाश्यस्यतद्व्यक्तित्वनाखंडस्वरूपयावाहेतु
त्वेगौरवाभावात्। तन्त्वाद्यसमवायिसंयोगनाशत्वेनहेतुतायांगौरवात्सा
म्याच्च। तस्मात्तुरीतंतुसंयोगस्यपटंप्रतिनिमित्तत्वमेव। नासमवायित्व
मितिपातनइति। नचसंयोगेति। हस्तेतरसंयोगादेःकायतरसंयोगादि
कंप्रतितुरीतंतुसंयोगादेश्चतुरीपटसंयोगादिकंप्रत्यसमवायित्वसत्वात्सा
मान्यलक्षणाव्याप्तिर्नदोषाय। विभागाद्यसमवायित्वंलक्षणंतुसं
योगादिभिन्नत्वमेवपटाद्यसमवायित्वलक्षणंतुरीतंतुसंयोगादिभि

न्नत्वंदयमितिविशेषलक्षणाव्याप्तिरपिनास्तीत्यक्षरार्थः। दूषणांतरमाह
किंचज्ञानादिरिति। आत्मविशेषेति। अत्रसत्यंतंज्ञानादिरिच्छाद्यसमवायि
कारणत्वंवारणायपरेति। तादृशेति। कार्यकारणान्यतरैकार्थसमवेतत्वमित्यर्थः। तादृ
शप्रयासनिगर्भकारणत्वाभावव्याप्यधर्मोघटरूपत्वादिस्तत्समानाधिकर
णमेवरूपत्वादीतिरूपादावसंभवात्तादृशप्रयासनिगर्भकारण
त्वाभावव्याप्यजातीत्युक्तं। घटरूपत्वादिरूक्तनजातीतिनोक्तासंभवः। तादृ
शकारणत्वेति। कार्यकारणान्यतरैकार्थप्रयासनिगर्भकरणत्वमित्यर्थः। सामा
न्यतः। संयोगत्वादिना। विशेषत्वेति। विभागाद्यसमवायित्वलक्षणंतुसं
योगादिभिन्नत्वंदयमित्यर्थः। सामान्यतइति। तादृशप्रयासनिगर्भका
रणत्वाभावव्याप्यजातिःपरत्वत्वादिवदणुत्वत्वादिकापितत्समानाधिकरण

भवमाणत्वंनत्वसमानाधिकरणमितिसामान्यतःपरिमाणत्वेनासमवायि
कारणत्वव्यवहारविषययोरणुत्वपरममहत्वयोरव्याप्तिरित्यर्थः। नचतादृ
शापरिमाणत्वमादायापकृष्टमहत्वादावव्याप्तिः। तादृशकारणत्वाभा
वव्याप्यारणुत्वत्वादिजात्यसमानाधिकरणापकृष्टमहत्वत्वादिकमादा
यतल्लक्षणसंभवात्याह्यापात्। तादृशकारणत्वाभावव्याप्यजात्यस
मानाधिकरणधर्मसमवायित्वरूपपारिभाषिकंयद्यसमवायिकार
णत्वंतदासमवायिकारणत्वव्यवहारस्यानिर्लाघवात्मकस्यान्यर्थस्यानु
पपत्तिरित्यनुगतकारणतावित्रोषणायदुक्तंनवस्उपपाद्यस्तथास
ति सएवावासकिंपारिभाषिकेणेत्याह। असमवायीति। अकारणत्वं।
प्रयोजकमितिरूपं प्रयकारणत्वं। परत्वादेरपिविषयतयाप्रसक्तेहेतु

त्वादितिभावः। उक्त ---------- सिद्धेरित्यर्थः। विरोधीति।
अयंतोभावत्वावच्छेदनप्रतियोगिविरोधानुभवविरोधवलान्मूलेवृक्षइतिप्रती
तिर्बाधएवकिनस्यादतआह। घटायंतोभावस्येति। तदकल्पनात्। सामान्य
तोयंतोभावत्वावच्छेदनप्रतियोगिविरोधाकल्पनात्। तथाचमूलेवृक्ष
इतिप्रतीतिःनिराबाधवतिभावः। अवच्छिन्नांत अद्याद्यवच्छिन्नांतं। एतद्
यकल्पनेवेति। कल्पितसंयोगाद्यत्यंताभावेकपिसंयोगादिमदवृत्तित्वकपि
संयोगादिमद्धर्मिककपिसंयोगादिनिश्चयत्वावच्छिन्नप्रतिबध्यज्ञानवि
षयत्वोभयकल्पनेवरूपाद्यसंतोभावगौरवात्लघीयसीतिभावः। प्रा
माणिकेति। मूलेवृक्षःकपिसंयोगवानग्रइतिप्रतीतिसिद्धतनकपिसंयो
गाद्यंतोभावाद्यवच्छिन्नकपिसंयोगवदवृत्तित्वादिद्वयस्यैवकल्पनादिस

र्थः। अन्यथा। कथंचिल्लाघवमात्रस्येवादरणीयत्वे भावाभावेति। द्रव्यादिपक्षा
न्यतमत्वविधिमुखप्रत्ययवेद्यत्वंवाभावत्वं। यदिचलाघवाद्विरोधानकल्प्यतत्व
दाकृत्यभावाभावकल्पनेवनस्यादितिभावः। ननुयद्येतद्दृयंत्रामाणिकंतदात
स्मनकल्पनीयत्वंवृक्षत्वादियतआह। किंचेति। आद्यस्येति। अग्राद्यवच्छिन्न
कपिसंयोगवद्वृक्षत्वस्यकपिसंयोगवद्वृत्तित्वेनत्वदभिमतेतत्रभावरूपत्वा
नतकल्पनेगौरवमित्यर्थः। व्याप्यवृत्तीति। वृक्षादिरूपादोव्याप्यवृत्ता
वप्याद्यावच्छिन्नवृक्षादिवृत्तित्वभ्रमसंभवाद्याद्यावच्छिन्नवृक्षादिधर्मि
कतत्तन्निश्चयत्वावच्छिन्नप्रतिबंध्यज्ञानविषयत्वस्यव्याप्यवृत्तिरूपाद्य
संतात्यभावइवकपिसंयोगाद्यसंतात्यभावेपिकूटत्वानतकल्पनगौरवमित्य
र्थः। एवं। कपिसंयोगाद्यसंतात्यभावस्याव्याप्यवृत्तित्वेप्रत्यूहमभिमतंक

पिसंयोगाद्यभिन्नद्रव्याप्यवृत्तित्वंदूषयितुंनव्यमतमुपन्यस्यति। नव्यास्त्विति। मे
दमात्रस्यव्याप्यवृत्तित्वनियमरूपबाधकसत्वान्नकपिसंयोगीतिप्रतीतिस्व
दसंतात्यभावत्वप्रकारकत्वेनसमर्थ्यतइत्यतआह। सहस्रेणेति। सहस्रबाधक
सद्भावेप्यन्याकारप्रतीतेरन्याकारत्वेनसमर्थनमयुक्तं। भ्रममात्रोच्छेदा
पत्तीति भावः। मूलेवृक्षोनकपिसंयोगीतिशाद्दप्रतीतेरसंतात्यभावत्वप्रका
रकत्वदूषणांतरमाह। अनुयोगिनीति। आधेयतावाचकसप्तम्यंतइत्यर्थः।
सप्तमीविनापिमुखंनचंद्रइवयादौमुखेचंद्रयादृश्यात्संतात्यभावबोधोद
यादाहनिपातातिरिक्तेति। अन्यथेति। अनुयोगिनिसप्तम्यपेक्षयाघटो
नघटइत्यादिवाक्यस्यापिघटेघटात्यंतात्यभावबोधमादायप्रामाण्यापत्तेरि
त्यर्थः। ननुप्रकृतेत्यर्थेति। तथाचानुयोगिनिसप्तमीविनापिकपिसंयोगाद्य

ताभावसंबंधीवृक्षइत्यन्वयबोधः। ननुनयोपस्थितसंबंधिनस्तादात्म्येनवृक्षान्वया
दितिभावः। परेषामिति। यथाप्राभाकराणांमतेनकलंजंभक्षयेदित्यत्रवि
धिप्रत्ययसमभिव्याहृतप्रकृत्यर्थस्यभक्षणस्यनञर्थेनैवान्वयालञर्थस्य
चविध्यर्थेकार्यान्वयात्कलंजभक्षणाभावविषयकंकार्यमितिबोध
स्तथाप्रकृतेपिप्रागुक्तबोधः। दृष्टांतताचास्यनञर्थप्रत्ययप्रकृत्यर्थान्व
यमात्रांशइतिभावः। तादृशेति। मतुभ्रमभिव्याहृतनञर्थमतुप्रकृत्य
र्थान्वयोमतुवादिप्रकृत्यर्थांतरिक्तनामार्थसंताभावबोधएवचानुयो
गिनिसप्रत्यपेक्षेतिरिक्तकल्पनायांगौरवादित्यर्थः। ननुप्रामाणिकं
गौरवंनदोषायेयतोभट्टव्याप्यवृत्तित्वेदोषांतरमाह। पाकरक्तइति। नञ
र्थेयंतताभावे। अन्वयासंभवादिति। इतरविशेषणत्वेनोपस्थितस्यान्या

न्वयोनिराकांक्षत्वादितिभावः। लाघवादिति। कपिसंयोग्यादिभेदस्यव्याप
वृत्तित्वेकपिसंयोगात्यंताभावसमानियतत्वेनतादात्म्यकत्वेनधर्मिभेदाक
ल्पनालाघवं। भेदस्तावद्पाधिभेदाच्चव्यवहारभेदोत्कर्षपर्यंतइतिभावः।
नचैवमिति। यादृसमानियतत्वाल्लाघवाच्चकपिसंयोगात्यंताभावएव
कपिसंयोग्यादिभेदःसचयत्रवाक्येमूलेदृश्यानकपिसंयोगीत्यादावबाधि
तस्तत्रयोग्यंतदाकपिसंयोगोनकपिसंयोगीयपिवाक्ययोग्यंस्यात्। क
पिसंयोगिभेदरूपस्यकपिसंयोगात्यंताभावस्यकपिसंयोगेपिसत्वादित्य
क्षरार्थः। प्रतियोग्यनुयोगिवाचकेति। तथाचकपिसंयोगोनकपिसं
योगइत्यत्रकपिसंयोगस्यतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकभेदोबो
ध्यः। परंतुसबाधितइतितदयोग्यं। कपिसंयोगात्यंताभावस्यकपिसंयोगि

भेदरूपस्यतत्रसत्वेपिकपिसंयोगभेदत्वविशिष्टस्यासत्वादितिभावः। आचार्यमत
माहश्यामादीतिनथावेत्प्रतीत्यविरोधायपाकरक्तोनश्यामइत्यादौश्यामोर
क्तइत्यादौपृथक्श्रुतान्यान्याभावपरएवनतुगुणापरइतिभावः। पाकरक्तश्या
मरूपवतावैधर्म्यमेवभासतइतिवाच्यंनतुभेदइतिनस्तस्याप्यप्रतीतित्वमि
तिभावः। तत्रोवैधर्म्यपरतायामाह। अवयवीति। अवयविपृथिव्यादि नै
मित्तिकद्रवत्वस्यापिवैशे। शिकमतेयावद्द्रव्यभाविनेनलक्ष्यत्वादित्यर्थः।
सांसिद्धिकद्रवत्वस्येतिपाठस्योपादेयत्वेचावयविपृथिव्यादि नैमित्तिक
द्रवत्वस्यलक्ष्यबहिर्भावितासादयावद्द्रव्यभावित्वंलभ्यतेतच्चवैशेषिकनय
परमाणावेवपाकेनगुणानाश्रयीकरादिपाकक्रमामितिभावः। प्रभ्वः।
वाच्यस्यतिमिश्रादयः। कार्यकारयोति। घटविशेष्यकघटत्वप्रकारके

ज्ञानंप्रतिघटविशेष्यकघटत्वप्रकारकज्ञानंकारणमित्यत्रकार्यकारणात
यारवच्छेदकत्वेनेत्यर्थः। व्यवहारेति। घटविषयकंज्ञानमितिवद्घटविषय
मिच्छादीतिव्यवहारबलेनेत्यर्थः। नातिप्रसंगइति। भावनानिर्विषयकत्वेघट
नुभवजन्यभावनातःपटःस्मृतिःस्यादित्येवंरूपानातिप्रसंगइत्यर्थः। प्रा
गुक्तस्मृतिनिश्चयकार्यकारणभावस्यभावनासविषयकत्वाद्यत्किंचि
दनंदूषयितुमुपन्यस्यति। यावितिं। नचममेतिदंशेउपेक्षामात्रस्यदं
शेस्मरणंसमूहालंबनादितोजायतेतदंशीयोपेक्षामात्रस्यज्ञानांतर
भूतस्मृतेरेवेत्यर्थः। तदंशेउपेक्षात्वेन। तदंशीयोपेक्षात्वेनरूपेणेत्यर्थः। नथा
चभावनासाविषयकत्ववादिनोममआंशिकोपेक्षामात्रस्यआंशिकोपेक्षा
त्वेनान्यतमत्वादिनावाभेदएकएवभावनाहेतुतावच्छेदकेप्रविष्टः। सर्वांशि

पक्षास्थलेचतद्विषयकभावनाविरहादेवतद्विषयकस्मरणमुपपद्यतइतिनतद्ज्ञ
दस्यापितत्रप्रवेशइतिलाघवंबोध्यं। प्रवृत्तिनिवृत्यजनकस्याज्ञातविषयत्व
स्यवापेक्षात्वस्यानुगतस्याभावाद्दंततोन्यतमत्वेति। तवतु। निर्विषयकत्ववा
दिनस्तु। इदंधेति। आंशिकापेक्षाभेदानांस्मृतिहेतुतावच्छेदकेसर्वांशोपेक्षाभे
दानांचभावनाहेतुतावच्छेदकेप्रवेशागौरवमित्यर्थः। मम। निर्विषयकत्ववादिनः
ताद्दशस्मृतित्वेन। तत्तद्विशेष्यकतत्तत्प्रकारकस्मृतित्वेन। नवत्वंसविषयकत्ववादिन
स्तु। आंशिकापेक्षाज्ञानस्थलेऽनुभवस्थापिसंकरस्यापिचतत्तदांशिकापेक्षाभे
दविशिष्टतत्तद्विशेष्यकतत्तत्प्रकारकनिश्चयेनतथाविधसंस्कारत्वेनचतथाविध
स्मृतिंप्रतिहेतुत्वमितिनानाकार्यकारणभावः। अन्यथोपेक्षणीयांशेपिसमू
हालंबनानुभवात्तज्जन्यभावनात्वांशस्मरणापत्तिप्रसंगादित्यतिगौरवमित्यर्थः।

समानाकारेति। सामान्यतः फलस्यभावनानाशकत्वेघटपटाविति समूहालंब
नजभावनातोघटत्वद्रव्यत्वमितिविशिष्टानुभवजभावनातश्चकदाविद्वटस्म
रणानंतरंकालांतरेपटस्मरणानुपपत्तिः। आद्यस्मरणेनैवतन्नाशसंभवादिति
तद्विशेष्यकतत्प्रकारकफलस्यतद्विशेष्यकतत्प्रकारकभावनानाशंप्रतिहेतु
त्वंवाच्यं। एवंचसमूहालंबनादिजन्यभावनायाउभयादिविशेष्यकायानघ
टमत्रस्मरणेननाशः। तस्यघटत्वावच्छिन्नमात्रविशेष्यकत्वेनतद्भावनास
मानाकारत्वाभावादितिकार्यतावच्छेदकघटकतयाभावनायाः सविषयक
त्वसिद्धीत्यर्थः। चरमफलस्यैवेति। तथाचसमूहालंबनादिजभावनाया
चरमफलेनैवनाशाच्चततः क्रमिकस्मरणानुपपत्तिः क्रमिकस्मरणानंत
रंचसमूहालंबनादिस्मरणस्याकल्पनाल्लाघवमपीतिभावः। जनकतयेति।

तथाचस्मृतिक्षणोत्पन्नसंस्कारस्यतत्स्मरणानन्त्राः। जनकतासंबंधेनतत्स्मरत्व
त्रासत्त्वादितिभावः। तत्तेन। तत्पुरुषीयचरमस्मृतित्यादिना। वैजात्येनेति। नचा
त्रवैजात्येमानाभावः। चरमस्मृतिमात्रभावनासामान्यनाश्याजनकतावच्छेदकत
यातन्नाशेत्येः। समानाधिकरणस्मृतिपूर्ववृत्तित्वाभाववत्स्मृतित्वरूपचरमस्म
तिरूपचरमस्मृतित्वेनतद्धेतुत्वेगौरवात्। इत्थंचस्मृतिभावनयोर्नाश्यनाशक
भावोपपन्नोनभावनायाः स्वविषयकत्वोपगइतिभावः। एवंसतीति। भावना
सामान्यनाश्यंप्रतिवैजात्येनचरमस्मृतेर्हेतुत्वेसतिनिश्चिन्वतस्तद्भावनानांवैजा
तीयचरमस्मृतिपर्यंतंसत्वभावश्यकं। तथाचयद्भावनाभिर्दृश्यंचस्मरणा
निजातानिअन्येचनजन्यंतेवस्तुतोजनितोपेक्षात्मकचरमस्मृत्यापूर्वभावनाना
श्याद्भावनांतरानुत्पादात्तत्रनस्मृत्यंतरमितिभावः। एतेन। भावनाविनाशि
त्ववर्णनेन। भावनायाः। ध्वंसात्मकभावनायाः। ननुवस्तुतस्तत्तद्भावनाजन्यतत्त
चरमफलंतत्तद्भावनानाश्यंप्रतिहेतुः ननुसमानाकारंफलं। घटानुभवजन्यभा
वनायाः तज्जन्यस्मृत्यानाश्यत्वंतज्जन्यस्मृतिभावनास्वीकरणाय। अन्यथा
मेघटस्मृत्यनुपपत्तिरितिस्मृतिजन्यानंतभावनाप्रसक्तेरतोनतत्स्मृतिविषयक
त्वसिद्धिरिसस्वरसादाह। किंचविशिष्टेति। अत्रकार्यतावच्छेदकहेतुतावच्छे
कयोः संस्कारेच्छादिसाधारण्यायनतरज्ञानत्वनिवेश्याः। दंडोरक्तोनवेति।
संशयादपिरक्तदंडवानितिविशिष्टवैशिष्ट्यविषयत्वावच्छिन्नस्यास्मृतित्व
रूपायहेतुतावच्छेदकेविशेषणतावच्छेदकाभावाप्रकारेति। तथाचविशि
ष्टस्यवैशिष्ट्यमितिन्यायेनविशिष्टवैशिष्ट्यविषयित्वावच्छिन्नमात्राभिमा
नंविशेष्यविशेषणंतत्रचविशेषणांतरमिति। न्यायेनतादृशबोधस्यसंश

यादप्युपपन्नमितिबोध्यं। ननुप्रयत्नस्यजातितयालघुत्वेननत्निवेशापिगौरवम
तआह। रक्तइति। उक्तसंज्ञायपि। दंडोरक्तोनवेतिसंज्ञायपि। दंडोरक्तइत्यनुबुद्ध
ति। अनेनविशेषणतावच्छेदकाभावाप्रकारकविशेषणतावच्छेदकप्रकारकत्वा
वच्छिन्नस्यहेतोः सत्संदेहितः। उक्तानुमितेः। रक्तदंडवानियनुमितेः। उपनी
तभावेनस्य। रक्तदंडवानियउपनीतभानस्यालौकिकसन्निकर्षाभावादनुमिस
पनीतभानयोरभेदाद्दानं। रक्तेतरदंडाभाववत्पुरुषइतिज्ञानमहकृत
स्यदंडव्याप्यवान्पुरुषइतिपरामर्शस्यसत्वाच्चनानुमित्यापादनाविरोधइति
भावः। विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावविविनिष्टविशेष
णतावच्छेदकप्रकारकत्वेनहेतुत्वे। विशेषणविशेष्यभावविनिगमकाभा
वात्कार्यकारणभावद्वयंकारणतावच्छेदकगौरवंचेतिविशेषणतावच्छेदका

भावप्रकारकज्ञानस्यविशिष्टवैशिष्ट्यविषयितावच्छिन्नप्रत्यक्षप्रतिबंधकत्वकल्प
नमेववरमित्यभिप्रायेणाहनोपादेयमेववेति। ननुविशेषणतावच्छेदकाभा
वप्रकारकसंशयसत्वेपिविशेष्यविशेषणमितिन्यायेनरक्तदंडवानितिबो
धोदयात्कथंनचतस्यप्रतिबंधकत्वंइतितन्न्यायेनतादृशबोधेपिप्रतिबंध
कत्वमभ्युपेत्यप्रागुक्तातिप्रसंगंनिराकरोति। विशेषणतेति। विषयितावच्छि
न्नपीसपिनाविशिष्टस्यवैशिष्ट्यमितिन्यायेनविषयितावच्छिन्नस्यसं
ग्रहः। ननुविशिष्टवैशिष्ट्यविषयितावच्छिन्नविशेषणतावच्छेदकाभाव
प्रकारकज्ञानस्यप्रतिबंधकत्वेयत्रदंडोरक्तोनवेतिसंशयानंतरद्वितीयक्ष
णेदंडोरक्तइतिनिश्चयस्तदनंतरंतत्रतादृशफलोत्पत्तिःकथमित्यतआ
ह। संशयनाशएवेति। ननुसंशयनाशएवतन्निश्चयात्फलोत्पत्तिरुपगम्यतु

मवविरोधः तान्निश्चयद्वितीयक्षणएवफलस्यानुमाविकत्वादिरुचेराह। एत
न्निश्चयति। लाघवादाह। किंचेति। निवेशादिति। तथाचतत्तद्घटोधकाभाव
विशिष्टभावनात्वाभावविशिष्टंयत्तद्विषयानवच्छेदकप्रकारकंतत्त्वेनैव
हेतुत्वमित्यर्थः। एतावतैव। विशिष्टवैशिष्ट्यविषयितावच्छिन्नहेतुत्वावच्छे
दकेउद्बोधकाभावविशिष्टभावनात्वाभावस्यनिवेशानैव। उद्बोधकानां।
विशेषणतावच्छेदकमात्रप्रकारकभावनोद्बोधकानां। स्मृतौ। विशिष्टवै
शिष्यविषयकस्मृतौ। मतांतरमाहतत्तद्विषयकेति। घटविषयकापेक्षा
नंतरघटसंज्ञायानंतरंचघटत्वप्रकारकघटविषयकस्मरणाभावोपपत्तये
घटविषयकोपेक्षादेर्घटविषयकभावनांप्रतिबंधकत्वमनन्यंवाच्यं। अ
न्यथाभावनानिर्विषयकत्वेभावनासामान्यंप्रतितदुपेक्षादेः प्रतिबंधक

त्वमियत्ववाच्यं। तच्चनोपपद्यते। घटापेक्षादिकालीनादनुपेक्षात्मकपटज्ञानादपि
तत्रात्मनिभावनानुत्पत्तिप्रसंगादितिभावः। इयप्पादुरिसस्वरसोद्भावनंतद्बीजं
तुतत्तद्विषयोपेक्षात्मकपटज्ञानादेस्तत्तद्विषयकस्मृतियोग्यभावनाप्रतिबं
धकत्वेनाप्युपपत्तेर्नतत्तद्विषयकत्वसिद्धिरिति। नव्यमतयोक्तभावनासविषय
कत्वसाधनेप्रकारांतरेणदूषणमुद्भावयन्नाह। यदिचेति। अस्यचइतिवि
शेषणान्वयः। नव्यैःसमूहालंबनादिस्थलेएकंसंस्कारमप्युपेत्य
तत्तद्विषयकत्वंसाधितंनानासंस्कारमप्युपेत्यनुदूषणमुद्भाव्यइत्यतोय
दिचेत्यर्थः। अकिंचित्करइतिसमूहालंबनादिस्थलेघटपटादिक्रमिकस्मर
णानुपपादकइत्यर्थः। अकिंचित्करत्वमेवोपपादयति। घटपटाविति। आदीति।
अविरोधेन। घटादिस्मृतिजनकसमूहालंबनादिजन्यत्वाविरोधेन। आप्य

व्यापकेति। यत्संस्कारेघटपटोभयघटपदादिस्मृतिहेतुतावच्छेदकवैजात्यंतत्रकेव
लघटादिस्मृतिहेतुतावच्छेदकवैजात्यमितिव्याप्यव्यापकभावायत्नेनेत्यर्थः। त
दिसंस्कारस्यव्याप्यव्यापकभावापन्नविभिन्नवैजात्येनघटादिघटवदादिस्म
तिंप्रतिहेतुत्वंतदाघटपटोभयादिस्मृत्यसत्तौकेवलघटादिस्मृत्यनुपपत्तिरित्याश
दतआहमिथाविरुद्धानवेति। विभिन्नवैजात्येनेत्यनुवर्तते। ननुभावनायानि
र्विषयकत्वंविशिष्टवैशिष्ट्यानुभवजभावनायांतुविशिष्टवैशिष्ट्यस्मृतिर्न
स्यात्। तदव्यवहितपूर्वंविशेषणतावच्छेदकप्रकारकस्यतद्धेतोरसत्वादतआह
विशिष्टवैशिष्ट्येति। तथाचविशिष्टवैशिष्ट्यानुभवजभावनातोभावनांतरा
द्यथमंविशेषणतावच्छेदकरक्तत्वादिप्रकारकदंडादिस्मृतिस्तदनंतरमेवसर
क्तदंडवानितिस्मृतिर्नोच्छिद्यतेनकापिस्मृतिरितिभावः। प्रथमंविशेषणा

तावच्छेदकरक्तत्वादिप्रकारकस्मृतिकल्पनायांगौरवादनुभवबाधेराधाच्चाह। विशिष्ट
ति। तथाचविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षएवविशेषणतावच्छेदकप्रकारकत्व
नहेतुत्वंननुतादृशस्मृतावपीतिनानुपपत्तिः। आदिपदेनकार्यकारणभावस्या
पिसंग्रहादितिभावः। ननुविशिष्टवैशिष्ट्यप्रत्यक्षएवयदिविशेषणतावच्छेदक
प्रकारकत्वंनहेतुत्वंतदारक्तेतरदंडाभाववान्दंडव्याप्यवांश्चपुरुषइतिपरामर्शा
दिक्तोदंडोनघटतिसंशयकालेपिरक्तदंडवानियनुमितिःस्यादित्येतदप्यापरिहरतिसंशयकालइति। यदुक्तंकिंचेतिपक्षेणतावतैवेत्यादिनाभावना
याउद्बोधकानांचनपृथक्विशिष्टवैशिष्ट्यविषयकस्मृतिहेतुत्वमितिनदूष
यति। भावनायाइति। रक्तदंडवानियादिविशिष्टवैशिष्ट्यविषयकस्मृतिहेतु
त्वंस्मृतिंप्रतिविशिष्टवैशिष्ट्यांशेभावनायाउद्बोधकस्यचपृथक्हेतुत्वभाव

स्यकंनतूद्बोधकाभावविशिष्टभावनात्वाभावविशिष्टविशेषतावच्छेदकमात्रप्रकारकभा
वनामात्रेणानिर्वाहकेइत्यर्थः। अन्यथाविशिष्टवैशिष्ट्यांशेभावनायाउद्बोधकस्य
चताइत्यास्मृतिंप्रतिप्रतिबंधकत्वकल्पनोदंडोरक्तइत्यनुद्बुद्धभावनातइति। इदंचोद्बो
धकाभावविशिष्टभावनात्वाभावविशिष्टविशेषणतावच्छेदकमात्रप्रकार
कत्वावच्छिन्नस्यसत्वप्रदर्शनाय। दंडोरक्तइतिनिश्चयेति। इदंचताद्दशाभाव
नात्वाभावविशिष्टविशेषणतावच्छेदकमात्रप्रकारकनिश्चयत्वेनयदिह
तुत्वंतदाप्युपपत्तिदर्शनाय। तत्तद्विषयकोपेक्षेतिमतांतरेतंप्रभावनायाः
सविषयकत्वसाधनंदूषयतिउपेक्षान्यथेति। ननुविशेषणाविशेष्यभावे
विनिगमकाभावाउपेक्षान्यज्ञानत्वेनज्ञानत्वविशिष्टोपेक्षान्यत्वादिना
चस्मृतिहेतुत्वेनानाविधकार्यकारणभावायागौरवमतआह अवच्छेदक

ताया इति। स्मृतिकारणतावच्छेदकतयाउपेक्षान्यत्वसंशयान्यत्वज्ञानत्वेतित्रि
तयवृत्तित्वान्नोपेक्षान्यसंशयान्यज्ञानत्वावच्छिन्नस्यस्मृतिंप्रतिनानाकार्यका
रणभावाइत्यर्थः। भावनायाःसविषयकत्वेयदिचेत्यादिनोद्भावितंदूषणं
निरसितुमाह। नसमूहालंबनादितइति। ननुनानाविधभावनानांनानाविधविषयिताकल्पनापेक्षयासमूहालंबनादितानानासंस्कारादिकल्पनमेवलघ्वित्यतआह। ज्ञानादिगतेति। भावनाजनकज्ञानादिगतयर्थः। ननुनियमाधारणज्ञानादिगतविषयितायाएवभावनायांकल्पनेतस्यारक्तदंडवानिति। विशिष्टवैशिष्ट्यानुभवजन्यतावच्छेदकत्वंनस्यात्। नित्यवृत्तिधर्मस्यकार्यतावच्छेदकत्वादित्यतआह। कालिकावच्छिन्नेति। अनित्यस्वरूपस्यैवकालावच्छिन्नत्वात्कालावच्छिन्नस्वरूपसंबंधेनजन्यज्ञाननि

घेव। निमज्ज्ञानव्यावृत्तेवा विषयिता भावनायांकल्प्यते। तस्मात्रूजन्यतावच्छेद
कत्वेनकिंचिद्बाधकमितिभावः। भावनायाउद्बोधकस्यचेत्यादिनाऽऽरूढदंडवानि
तिविशिष्टवैशिष्ट्यांशेस्मृतिंप्रतिभावनाबोधकयोःपृथक्हेतुत्वावश्यकत्वंत
त्राहपत्रचेति। पत्रस्थलविशेषेरक्तदंडवानितिविशिष्टवैशिष्ट्यस्मृतौविशे
षणांशेवैशिष्ट्यांशेचसंस्कारोद्बोधकयोरेकत्वेसतिअन्यथादंडीरक्तइति
प्रामुक्तातिप्रसंगोनास्तितत्ररक्तदंडवानितिविशिष्टवैशिष्ट्यस्मृतिंप्रत्यबोध
कभावविशिष्टभावनात्वाभावविशिष्टविशेषणतावच्छेदकप्रकारकत्वेन
भावनायाएवहेतुत्वानिर्वाहाद्बोधकस्यविशेषणतावच्छेदकप्रकारकज्ञा
नस्यापिचपृथक्हेतुत्वाभावेमलाघवमपि। तन्निर्विषयकत्ववादिनस्त
वेदंरासभेपिताहशस्मृतिंप्रतिविशेषणतावच्छेदकप्रकारकज्ञानस्यभा

वनायाउद्बोधकस्यापिचहेतुत्वमितिकार्यकारणभावत्रयकल्पनयातिगौरवमि
तिसमुदितार्थः॥ ॥पदार्थानांसाधर्म्यवैधर्म्यनिरूप्यत्वेषावधानायविशि
ष्यद्रव्यनिरूपणंप्रतिजानीते। अथद्रव्याणीति। विशिष्य। पृथिवीत्वजलत्वा
दिना। यद्यपिपृथिवीत्ववतीपृथिवीत्वेवलक्षणाभिधानंकर्तुमुचितं। तथापि
लाघवात्प्रयोजनाभिधानपुरःसरंलक्षणमाहपृथिवीति। उग्ररूपाच्यांविजा
तीयतेजःसंयोगात्वाच्यां। तत्त्वनएव। गंधनीलादिहेतुत्वाएव। तत्र। तेजसि। पृथि
वीत्वजातिसाधकंमतमादर्शयतिपरेति। अव्याप्यवृत्तिसमानाधिकरणावि
जातीयनानारूपैरवचित्रप्रत्ययव्यवहारोपपत्तावतिरिक्तचित्ररूपस्वीकारो
व्यर्थएवेतिमतेव्यभिचाराभावाल्लाघवाच्चावयवनीलेनावयविनीलत्वनि
रवकार्यकारणभावोनतुनीलादेस्वाश्रयसमवेतत्वसंबंधेननीलाभावस्य

विरोधित्वं। तत्संबंधावच्छिन्नतदभावस्यचेहत्वं। गौरवात्। पाकजनीलादौतुपाकजन्य
न्यपूर्वरूपध्वंसश्चकारणमित्येतावतैवगगनमनोवायुपरमाणवादौनीलाद्यु
पादनासंभवान्ननीलादिकंप्रतिपृथिवीत्वेनहेतुत्वकल्पनंस्यादित्यतश्चित्ररूपस्वी
कारइष्टः। इदंचवैशेषिकनयन्यायनयश्चैतन्मतयोरप्यस्तीति। चित्ररूपास्वीका
रउक्तानुपपत्तेरुभयमतेपिसमानत्वादितिबोध्यं। पाकादवयविन्यपिपूर्व
रूपादेर्नाशउत्तरनीलाद्युत्पत्तिश्चेति। न्यायनयेपिपूर्वोक्तरीत्याकार्यकारण
भावादवगगनमनोवायुपरमाणवादौनीलाद्यापादनासंभवान्ननीलादि
कंप्रतिपृथिवीत्वेनहेतुत्वकल्पनंस्यादतआह। पाकादिति। स्वाश्रयेति। स्वंनी
लादिप्रतिबंधकत्वेनाभिमतानीलाभावादिस्तदाश्रयपीतकपालादिसमवे
तत्वसंबंधेननीलाभावादिः पीतघटादावेवप्रसिद्धस्यतत्संबंधावच्छिन्ना

भावोनीलावयवकघटादावस्तीतिभवतिनीलादिनियाम्यइत्यर्थः। नचनीलाभा
वादेस्तादृशसंबंधावच्छिन्नाभावोयदिनीलाद्यात्मकस्तदानीलत्वादिनैवहेतुता
रूक्। लाघवादितिवाच्यं। पृथिवीत्वसाधनान्यथानुपपत्यातिरिक्तरूपेणतस्यस्वी
कारात्। नचैवमप्यवयविनीलादौनीलत्वादिभासमवायित्वमावश्यकमिति
तथैवहेतुत्वमस्त्वितिवाच्यं। एतन्मतेभावकार्यस्यसासमवायिकारणकत्व
नियमाभावादितिभावः। इत्थंचेति। अवयविनीलादौनीलाभावादेरभा
वस्यैवनियामकत्वेचावयविचित्ररूपेपिनीलपीतादिनियामकतत्तद्भाव
समाजस्यैवनियामकत्वसंभवान्निरूक्तन्यायेनचाक्षुषचित्रकल्पनागौरवमि
त्यर्थः। गगनेति। अत्रैवंनीलादिनियामकः स्वाश्रयसमवेतत्वसंबंधेननी
लाभावादेरभावोनीलघटादाविवगगनमनोवायुपरमाणवादावप्यव

वसमवेतत्वशून्यस्तीतितत्रनीलाद्युत्पत्तिवारणायनीलादिहेतुत्वंपृथिवीत्वेनवा
च्यमित्यर्थः। नचैवमिति। स्वाश्रयसमवेतत्वेननीलाभावादेरभावस्यैवनीला
दिहेतुत्वेइत्यर्थः। नचैवंगौरवमिति। नीलाभावादिकंप्रतिनीलाभावादेः
स्वाश्रयसमवेतत्वावच्छिन्नाभावत्वेननीलेतररूपानियतंतेजःसंयोगाभा
वत्वेनपृथिवीत्वेनचहेतुत्वत्रयकल्पनेगौरवमित्यर्थः। पाकेति। पाकावय
वनीलयोःतत्तन्नीलजनकतावच्छेदकजातिद्वयस्यपाकावयवनीलजन्य
नीलयोस्तदुभयजन्यतावच्छेदकजातिद्वयस्यचकल्पनेनलाघवादित्यर्थः।
एवमिति। नीलादिरीयेत्यर्थः। सौरभादीति। अत्रापिचित्रगंधस्वीकार
इतिबोध्यं। अन्यथासौरभादौसौरभत्वादिनैवहेतुत्वेगगनादौतदापाद
नासंभवान्नपृथिवीत्वेनतद्धेतुत्वकल्पनंस्यात्। इत्थंचसौरभादीतरगंधे

स्वाश्रयसमवेतत्वेनसौरभादिविरोधित्वंतदभावश्चतत्रकारणंवाच्यमितिगगनादाव
पितदभावसत्त्वाद्गंधात्पत्तिवारणायपृथिवीत्वेनहेतुत्वंवाच्यमितितत्सिद्धिरित्यर्थः।
ननुमण्यादौपृथिवीत्वसत्त्वेपिगंधानुत्पत्त्याव्यभिचारान्नतेनतद्धेतुत्वमित्यतआ
ह। मण्याद्यारंभेति। ननुनव्यनयेनुद्भूतगंधासत्त्वाद्व्यभिचारस्तदवस्थइत्यत
आह। अस्मदिति। विजातीयगंधेति। तथातत्रपरस्परप्रतिबंधान्नतत्रगं
धोत्पत्तिरितिनव्यभिचारइतिभावः। ननुविजातीयगंधवत्परमाणुश्यामाद्ये
मण्यादिप्रयोजकद्व्यणुके। चित्रएवगंधोस्तु। अवयवनष्टविजातीयनानो
गंधस्यतदसमवायिनस्तत्रसत्त्वादतआह। अस्मदिति। सामग्र्यंतरेति। सौरभा
दौसौरभत्वादिनैवकचिच्चित्रगंधेपिविजातीयनानागंधत्वेनहेतुत्वाकल्पना
न्नविजातीयगंधवदारब्धमण्यादिद्व्यणुकेचित्रगंधोसंभवतीतिभावः।

ननुगंधरसादिविशेषंप्रतिनपृथिवीत्वनहेतुत्वं। तद्हेतुविजातीयतेजःसंयोगविरहा
दवचान्यत्रतदनुत्पत्तिरतआह।अपिचेति। एकत्रभांडेजलमिश्रितपच्यमानव्यं
जनादिस्थलेभिघातात्मकतेजःसंयोगस्यजलक्रियांव्यंजनादिरसविशेषंप्रति
चैकजातीयाघवनहेतुत्वाज्जलेऽपिविजातीयतेजःसंयोगसत्वात्तरसविशे
षादिवारणायपृथिवीत्वनरसादिहेतुत्वमवश्यवाच्यमितिपृथिवीत्वसिद्धिरि
त्यर्थः। एकयाः पृथिवीत्वजात्या।अतिप्रसंगः।मधुरोत्पत्तिस्थलेआम्लाद्य
त्पत्तिप्रसंगः।परंतु।मतंदूषयति।नकृतइति।न्यायनयइति।पाकेनयुगप
दवावयवावयविनोःपूर्वरूपनाशानंतरंनीलोत्पादानुभवसिद्धोस्तिनत्व
स्यात्।स्वाश्रयसमवेतत्वसंबंधननीलाभावस्यत्वदाश्रितनीलादिविरो
धिनस्तत्रावयविनिसत्वादितिभावः।ननुस्वाश्रयसमवेतत्वेननीलाभावस्य

नीलादिविरोधिनःपार्थिवपरमाणावप्यवयवसमवेतत्वशून्येसत्वान्नत्रपाक
जन्यनीलोत्पत्तिःस्यादतआह।जन्यपृथिवीत्वनचेति।युक्तत्वादिति।तथाचाव
यवनीलादेर्गगनादावसत्वेनवनीलाद्यसत्तिवारणासंभवान्नतद्हेतुतावच्छे
दकतयापृथिवीत्वजातिसिद्धिरितिभावः।नचनीलेतररूपादिरवनीलत्वाद्यवच्छिन्नविरोधित्वंनतुनीलाभावाद
रित्यर्थः।तथाचयुगपदवावयवावयविनोःपाकेनपूर्वरूपनाशानंतरंनील
द्यत्पत्तौनबाधकंविरोधिनोनीलेतररूपादेस्तत्रासत्वादितिभावः।अपिचे
त्यादिनोक्तंपृथिवीधानंदूषयतिकिंचेति।द्रव्यविशेषस्यव्यंजनादिरसगंधा
दिविशेषजनकत्वेतेजःसंयोगविशेषापेक्षणान्नसंयोगस्यचजलत्वा
दावुत्पद्यमानक्रियाजनकतावच्छेदकव्याप्यजात्यैवमधुरादिरसहेतुत्वं।

नतुजलादिक्रियाजनकतावच्छेदकजात्येव।यत्किंचित्तेजःसंयोगादपिक्रियोत्पत्तिव
त्तमधुराद्युत्पत्तेरितिनजलादौरसविशेषापत्तिरितिनज्ञानकतावच्छेदक
तयापृथिवीत्वजात्यसिद्धिरित्यर्थः।स्वयंपृथिवीत्वंसाधयितुमाहतस्मादि
ति।यथामनःसिद्ध्यारंभकसंयोगःसंभवति।अतएवतद्घावर्तनायप्राचीनः
स्पर्शवत्वेननव्यैर्मनोन्यमूर्तत्वादिनाद्व्यारंभकत्वमुपेयते।तथाजलादावपि
रसगंधादिजनकतेजःसंयोगस्यापिसंभवान्नरसविशेषादिवारणायत
ज्ज्ञानकतावच्छेदकतयापृथिवीत्वसिद्धिरित्यर्थः।।७७तस्याः द्रव्यत्वव्यवस्थित
यगुणानाहसाचरूपेति।गुरुत्वमिति।फलाद्यवाप्तयतनंस्वसमानाधिक
रणाद्दृष्टगुणासमवायिकारणाकंपतनत्वात्।वेगार्जितद्वितीयादिपतनव
दित्यनुमानादितरबाधसहकृताद्गुरुत्वसिद्धिरित्यर्थः। अदृष्टवदात्मसंयोगा

दिकमादायसिद्धसाधनवारणाय।अदृष्टेति।अदृष्टादिकमादायतद्वारणायस्व
समानाधिकरणेतिगुणविशेषणं।नाशकेति।चरमसंयोगत्वरूपनाशकता
वच्छेदकचरमत्वंतत्क्रियाजन्यत्वसतितत्क्रियाजन्यसंयोगापूर्वत्वंनतुजातिः सं
योगत्वादिनासंकरादितितन्निवेशागौरवमित्यर्थः।वेगंखंडयितुमाहइदंतु
बोध्यमिति।स्पर्शवदिति।स्पर्शवद्द्रव्यसंयोगविरोधीनाशकोयस्यतादृशो
वेगः।अत्रस्पर्शवत्पदंस्वजन्यक्रियाजन्योत्तरसंयोगपरिचायकं।स्वपदंवेगप
रमितिप्राचार्यार्थः।चरमसंयोगोपलक्षकमिति।अत्रचरमत्वंतद्वेगजन्यचर
मकर्मजन्यत्वं।एवंतन्निवेशानान्नाशकतावच्छेदकेगौरवमनन्यगत्यासोढव्य
मितिभावः।वेगसाधकमतमाहयदिचेति।उभयथापीति।अनुष्णाशीत
त्वस्यजातितंमतेऽप्युष्णाशीतत्वस्पर्शत्वमतेपीत्यर्थः।एतेन।वक्ष्यमाणेननतु

द्यणुकादौपाकेनरूपांतरोत्पादसमयेपरमाणावपिरूपांतरंस्यादेवेतिकथंतस्य
नित्यत्वमतआह। पाकाच्चेति। तत्रपार्थिवपरमाणौ। ननुतत्रद्व्यणुकादिकार्य
स्मरूपादिविशेषरहितपरमाण्वारब्धत्वाद्दृष्टलक्षणंनस्यादतआह। पररूपा
दिकाच्चेति। एतेनतस्यार्थंविवृणोति। परमाणाविति। पार्थिवपरमाणौपा
कजरूपरसादिविशेषाभावेतृणादेर्दुग्धाद्युत्पत्तिनियमानुपपत्तिः। नहितृ
णादिकंसाक्षाद्दुग्धाद्यारभतेयति। गवादिनातृणादिभक्षितंतस्यापरमाण
वंतेसंगात्। किंतुतृणाद्यारंभकपरमाणवः। पाकजरूपरसादिविशेषसं
क्रम्यदुग्धाद्यारभंतेसचविशेषस्तत्रनवमतेनास्तीतितन्नियमानुपप
त्तिःसुदृढा। ननुपरमाणोपाकजरूपादिविशेषाभावेपिजातिकृतविशे
षवत्तादेवतृणादेर्दुग्धाद्युत्पत्तिनियमोपपत्तिः। पृथिवीजलत्वादीतरद्

व्यत्वव्याप्यजातेः परमाणावसत्त्वात्। अन्यथातृणादौदुग्धत्वादेर्दुग्धादौचतृण
त्वादेरुपलंभापत्तेः। परमाणुवृत्तिजातेर्द्व्यणुकाद्यंसावयविपर्यंतेषुसत्त्वादि
तिभावः। ननुविशेषेरपितृणाद्यारंभकपरमाणुभिर्द्व्यणुकादिक्रमेणदुग्धा
द्यारभ्यतेतत्तोद्व्यणुकाद्यंसावयविपर्यंतेघनत्वलाघवाद्यपदेवपाकाद्रूपर
सादिविशेषोभवतीतितन्नियमोपपत्तिरतआह। दुग्धद्व्यणुकेति। ननुदुग्ध
द्व्यणुकादिषुचरमद्रव्यएवपाकेनरूपरसादिविशेषानंतरालिकद्रव्ये। ए
वंचद्व्यणुकत्र्यणुकादिषुयुगपद्दुग्धसंक्रमेरसंभवेपिनक्षतिरितस्वरूपा
दाहकिंचेति। तत्रापिश्यामभेवेति। पाकोपिश्यामजंभकावयवरूपमपि
श्यामभेवभिद्रुतवेजात्यामात्यादिसिद्धावः। वृश्चिकदृष्टइत्यादि। रुकचुबि
कावचकुहिरीवृश्चिकपक्षीआग्याइतिमहाराष्ट्रभाषायांप्रसिद्धं। ननुचै

रनादि संयुक्तजलादौपाकजएवगंधविनाशोस्त्वियतिव्याप्तिर्वज्रलेपायितवेत्यस्व
रसादाहकिंचेति। उक्तयुक्त्या जलादौगंधादिजनकतेजःसंयोगस्यापिसंभवादि
त्याद्युक्तयुक्त्यातत्संभवःगंधसंभवः ननुवियतिविक्षिप्तेकालिंदीजलादौप्रती
यमानंशुक्लरूपमावलोकीयमेवास्त्वियतआह। जन्यस्वच्छेति। तथाचतज्जला
दौप्रतीयमानंशुक्लंस्वच्छत्वान्नालोकीयमितिभावः। रसगुरुत्वेति। रसगुरु
त्वसमवायीकारणतावच्छेदिकाजातिर्भूजलोभयसाधारण्येकेकल्प्यते
तयैवगंधरसादिसमवायीकारणत्वमित्यर्थः। भवत्येवेति। अन्यथाष्टावे
वोषंजलंपाययेदितिवैद्यकासंगतिरितिभावः। तच्चिंत्यमिति चिंतामणीजं
तुरातथाध्मायमानेपिकनकरजतपात्रस्थजलेपाकाद्गंधरसविशेषानुप्ल
वबाधितएव। भूजलोभसाधारणजातिकल्पनेगौरवंच। अन्यथास्पर्शि

समवायिकारणतावच्छेदकतत्पार्थिव्यादिचतुष्टयसाधारण्यपृथिवीजातिःसिध्येदि
तिबोध्यं। अनुद्भूतरूपसाधर्म्यकेषांचिन्मतमाह। जन्यस्वच्छत्वस्येत्यादि आदृत्यिय
तं। अस्वरसस्य। निरर्थकानंतानुद्भूतरूपादिकल्पनेगौरवमेवेति। सिद्धांतेवेति।
योग्यजलारंभकपरमाणुभिन्नाएव। अनुद्भूतरूपत्वादितिभावः। नन्वेवमत
साहवस्तुतस्त्विति। अनियतारंभइति। योग्यजलादिद्व्यणुकंसरूपाभ्यामेवा
रभ्यत इतिनियतारंभानास्तिमानाभावादितिभावः। नन्वेकस्यरूपादेरनारं
भकत्वमेवनियतारंभमानमतआह। एकस्यरूपादेरिति। नन्वेकस्यरूपादेरार
भकत्वेपार्थिवाप्यपरमाणुष्वामपिद्व्यारंभापत्तिः। तथाचतद्व्यसगंधवत्व
त्तेनहवत्वाच्चपृथिवीजलवत्तेद्व्यसंकरस्यादियरुचेराह। असहवेति। तथाच
सरूपद्व्यणुकंसरूपाभ्यामेवारभ्यतइतितत्रनियतारंभः अणुकेत्वनियता

रंभएव। सरूपद्वयनिरूपैकद्व्यणुकैरपितदारंभोपगमादितिभावः।लक्षितांष्टथि
वींविभजतेसयामिति।एकस्याएवनित्यत्वमनित्यत्वंचविरुद्धमतआहनित्यापर
माणविति।ननुनिरवयवद्रव्यावयवानांसावयवानवस्थाप्यनादित्वान्नदोषइत्य
रुचेराह।महाप्रलयेनेति।परमाणोरनित्यत्वेप्रलयेनांतरातस्यविच्छेदउ
त्तरसर्गेद्व्यणुकादिकार्यपरंपरायाअसंभवादित्यर्थः।इदंमतं।त्रिभिःपरमा
णुभिरेवत्र्यणुकमारभ्यतामितिमतं।द्व्यणुकत्वस्येति।परमाणुद्वयसं
योगेजायमानंद्रव्यंद्व्यणुकंभवतीतिनीलघटत्वादिवत्द्व्यणुकत्वस्यार्थस
माजतयोपपन्नस्यकार्यतानवच्छेदकत्वेनत्रिभिःपरमाणुभिस्त्र्यणुकोत्पा
दोद्व्यणुकापादनायोगादित्यर्थः।ननुतर्हिमास्तुत्रयेत्र्यणुकोत्पत्तिकालेद्व्यणुकापादनंपरमाणुद्वयेद्व्यणुकोत्पत्तिकालेतुत्र्यणुकात्पत्तिः

कुतोनेत्यतआह।त्र्यणुकानुत्पत्तिरिति।अपकृष्टपरिमाणसामग्रीमेवदर्शयति
द्वित्वस्येतियत्रसमवायेनजन्याणुत्वावच्छिन्नंद्रव्यंतत्रसमवायेनद्वित्वमितिव्या
प्तिसत्वाद्द्वित्वसमव्याप्यत्वसंबंधेनजन्याणुत्वंप्रतिहेतुत्वादित्यर्थः।ननुखास्त्र
यसमवेतत्वेनद्वित्वस्यहेतुत्वमास्तिवाच्यं।द्विकपालकघटादावपिजन्या
णुत्वापत्तेः।द्वित्वस्यव्याप्यत्वसंबंधेनतुघटत्वावच्छिन्नसत्वान्नातिप्रसंगइ
ति।नन्वस्तुपरमाणुद्वयेत्र्यणुकानुत्पत्तिरपकृष्टपरिमाणसामग्रीप्रतिब
धात्।परमाणुत्रयेतुकुतस्तदनुत्पत्तिरतआह।तत्तद्व्यणुकात्मकेतु।अथ
यादि।एवमपिपरमाणुत्वादिनाद्व्यणुकादिहेतुत्वेपि।तथाहेतुत्वेति।तंतु
त्वादिनापटादिहेतुत्वास्सिद्धिरित्यर्थः।ननुहितंतुकपटेतंतुत्वेनैवान्वयव्यति
रेकसत्वान्नतथाहेतुत्वसिध्यतस्यतावेवोत्पत्तिरस्तु।त्रितंतुकपटादस्तुकथमि



मित्यर्थः। किंचनवमतंतौ पटइतिप्रतीतेर्घ्रमत्वंवाच्यं। तच्चायुक्तं। पटेपटइतिप्रती
त्यसत्वादित्याहतंतावितिं। अतएवतंतुत्वेनपटत्वेनकार्यकारणभावादेव। पटादि
कंतज्ज्ञानकसंयोगंचप्रतिहेतुत्वादिनवहेतुत्वं। यवस्थाप्यारभ्यारंभकवादमपि
रूपयति। एतेनेति। पटादिज्ञानकविजातीयसंयोगस्यतंतुष्वेवसंभवात्। द्वितंतु
कपटादौत्रितंतुकाद्यत्पत्तेसमवेतेत्यर्थः। पुनःसएवरांकतेनान्विति। एवमपि।
तंतुत्वेनपटत्वेनैवकार्यकारणभावेपिनिराबाधेति। नवतंतुकादीनांद्वितंतुकप
र्यंतानांपूर्वेस्मिन्नानामेवसत्वादुपलब्धिर्निराबाधेत्यर्थः। ननुदृश्यतंतुकादिस्थ
लएवप्रथमादितंतुसंयोगविभागकमेणानवतंतुकाद्युपलब्धिर्नस्यात्तिपाम
नुपपन्नतयासत्वस्यवक्रमशक्यत्वादतआह। प्रथमादीति। अनुलोमक्रमोत्प
न्नद्वितंतुकादिन्यायसाम्यादाह। अस्त्वेवति। अयेइति। प्रथमादितंतुसंयोगवि

योगक्रमेणदृश्यंतंतुकादिनाशानंतरमित्यर्थः। पुनःशंकतेतथेति। व्याप्यस्थानीयेति।
सामग्र्याःकार्यतावच्छेदकावच्छिन्नोत्पत्तिव्याप्यत्वस्येवोपगमाद्व्याप्यस्थानीयापत्ते
रदूषणात्तत्पटादन्यत्रतंतुपटत्वसामानाधिकरण्यंनसंभवत्येवद्रव्यवत्तिद्व्यात्पत्तिस्तद्र
व्यत्वावच्छिन्नाभावहेतुत्वेनैवनिरस्यतइत्यनंतविभागपक्षादिकल्पनमनुचित
मितिसमुदायार्थः। दृश्यादीति। मध्यावच्छेदेनपटादिमत्यपितंत्वादौदृश्याद्य
वच्छेदेनद्रव्यत्वावच्छिन्नाभावसत्त्वात्तत्पटोत्पत्तिरित्यर्थः। ननुनिरवच्छिन्न
विशेषणतयाद्रव्यत्वावच्छिन्नाभावोहेतुरितिनोक्तदोषइत्यतआहदीर्घत्वादावि
ति। ननुदीर्घतंतवेपिवस्त्रयुगंनोत्पद्यतेकिंचकमवत्सरसादाह। अस्तवीति। त
थापीति। द्वितंतुकादिमतितंतुद्वयतृतीयतंतुसंयोगाच्चितंतुकोत्पत्तिःस्यादेव। नि
रवच्छिन्नविशेषणतयापि। द्रव्यत्वावच्छिन्नाभावस्यतृतीयतंतौसत्त्वादितिभावः।

अन्यथा। द्रव्यवत्तिसर्वथाद्रव्यानुत्पत्तौ। अत्रोच्यतइति। शततंतुकादिमहापटस्य
लेपूर्वंतिपन्नाद्वितंतुकाद्यत्पत्तिरस्यवतिपूर्वपक्षेसिद्धांतउच्यतइत्यर्थः। एकइतिअं
शेनशततंतुकादिर्विद्यादि। लौकिकद्रव्यव्यवहारस्यभ्रांतव्यवहारत्वशंकयासाधक
त्वासंभवादाह। स्मृत्यादाविति। तथाचैकः पटइतिलौकिकशास्त्रीयप्रतीतिव्य
वहाराभ्यांपटैक्यसिद्धेः। अन्यथाशततंतुकदानेनेकपटदानफलंस्यादितिभा
वः। पटैक्यप्रतीतिव्यवहारोदृश्यत्वात्नानात्वप्रतीतिव्यवहारयोरसत्वंदर्शय
तिनहीति। सदृष्टांतं। तन्नात्वंशंकतेअंगुलीति। नचात्रेति। शततंतुकादावपिद्वितं
तुकाद्यनुपलब्धेः सादृश्यादिवशादुपपत्तिर्नचेत्यर्थः। तेषांद्वितंतुकादीनां। क
श्चित्। चरमतंतुसंयोगविभागादौ। अन्येषां। नवतंतुकादीनां। ननुमहापटस्य
लेद्वितंतुकादिनाशकल्पनेक्वचिदन्येषांकल्पनेचगौरवमतआह। समवायेनेति।

तथाचद्वितंतुकादिनाराएवेतिमहापटोत्पत्तिनान्यथेतिभावः। ननुजन्यद्रव्यंप्रतिद्रव्या
भावस्यहेतुत्वेपटवतितंतुपुंजेदग्धावछेदनद्रव्याभावसत्वात्पटांतरोत्पत्तिःस्याद्
तआह। निरवच्छिन्नेति। ननुनिरवच्छिन्नविशेषणतयाद्रव्याभावस्यहेतुत्वेदीर्घतं
तुदोषस्त्वयुगंनस्यादतआहह्रस्वयुग्मादीति। नाद्रव्यविशेषणतयाद्रव्याभाव
हेतुत्वपक्षेपिद्वितंतुकादिमातितंत्वंतरसंयोगादेकतंतुकपटोत्पत्तिंनिरस्यति। ए
कतंतुकादीति। पटंप्रतितंतुत्वेनैवसमवायित्वंतंतुसंयोगत्वेनैवचसमवायित्वमि
तिनियमानभ्युपगंतॄणांएवयुक्तिविशेषंप्रागुक्तयुक्त्यैवदूषयितुमुपन्यस्यति।
एतेनेत्यादि। एकतंतुकव्यवहारंमुख्यत्वेनैवोपपादयितुंकल्पांतरमाह। अस्कंधा
श्रिरसीति। शिरावच्छेदेनेत्यर्थः। एतेनेत्यस्यार्थंविवृणोतिनिर्दिश्यति। तत्रतंत्व
वयवेषु। अवाचार्याइति। त्रिभिःपरमाणुभिरवयवैरणुकमारभ्यतामितिपूर्वप

क्षउदनाचार्याःसमादधतइत्यर्थः। प्रयोजनाभावादिनियतसाक्षात्काराद्रूपाद्युत्पत्ति
रत्रप्रयोजनं। द्व्यणुकाद्यारब्धस्यतुमहत्त्वाभावेनसाक्षात्कारासंभवान्नरूपा
द्युत्पादकत्वमितिनिष्प्रयोजनत्वंगगनादेरपिसप्रयोजननिष्पादकत्वात्तत्समक्षत
मेवेतिभावः। तदारब्धे। द्व्यणुकाद्यारब्धे। महत्त्वायोगादिति। अवयवगतस्य
महत्त्वस्यबहुत्वस्यप्रचयस्यवाऽसत्त्वादितिभावः। द्व्यणुकाभ्यामप्यारंभंसंभावस्था
पयति। द्व्यणुकाभ्यामिति। युक्तिबलादाह। इदंतुचिंत्यमिति। ननुपरिमाणत्वेने
वमहत्त्वासमवायिकारणत्वेतूलपिंडघटादौचतुल्यपरिमाणापत्तिरतआह। अ
लूकाद्विकपालकेति। गौरवादिति। कपालद्वयगतेकद्वित्वापेक्षयामहत्त्वद्वयस्यहे
तुत्वेगौरवादित्यर्थः। परमाणुभिरवयवैरणुकोपपत्तौ मध्येनिःप्रयोजकद्व्यणुकक
ल्पनायांगौरवादाह। अलूकाभ्यामिति। अतिलाघवादाह वलूकइति। सांकर्यपि

त्वेति। गगनमहत्त्वावधिकापकर्षतटिमहत्त्वावधिकोत्कर्षयोस्तटिमहत्त्वंगगनमहत्त्वेच
परस्परपरिहारेणवर्तमानयोरपिघटादिमहत्त्वेवर्तमानत्वात्सांकर्यापत्त्यर्थः। तज्जन्यता
वच्छेदकत्वात्। महत्त्वजन्यतावच्छेदकत्वात्। मीमांसकमतंदूषयति। इंधनावपीति। प्रा
चांमतमाह अतितन्नेति। नित्यांपृथिवींसाधयितुंनित्यांसाधयितुंपूर्वपक्षमाह। अ
वयविनीति। क्षणाभंगेति। सएवायमितिप्रत्यभिज्ञानान्यथानुपपत्त्याक्षणाभंगस्य
शास्त्रेनिरासादित्यर्थः। परमार्थसूत्रं। अक्षपादप्रणीतंसूत्रं। विजातीयसंयोग
विशिष्टपरमाणुपुंजएवघटादिरितिपूर्वपक्षितंनसंगच्छते। परमाणवनामतीं
द्रियत्वाद्घटादेश्चप्रत्यक्षादितिसूत्रार्थः। फलमुखगौरवस्यापीति। यथावयवरूप
त्वेनावयविरूपत्वेनचकार्यकारणभावेप्रामाणिकानंतरूपधाराप्रसक्तौतद्वार
णायरूपंप्रतिरूपत्वेनप्रतिबंधकत्वमपिकल्प्यतइतिफलमुखगौरवस्यापिक

विद्रूपत्वमित्यर्थः। तादृशसंयोगेति। द्व्यणुकत्वादिघटितसंयोगविशिष्टपरमाणु
वृत्तित्वंत्र्यणुकादिगुणकर्मादिप्रत्यक्षे। तादृशसंयोगविशिष्टपरमाणुवृत्ति
त्वंतद्गतगुणत्वादिप्रत्यक्षेतंत्रमित्यर्थः। क्वचित्। त्र्यणुकत्वादिघटकसंयो
गसमानाधिकरणानां। परंपरयेति। स्वप्रतियोगिसंयोगाश्रयत्वसंबंधेनपट
त्वघटकसंयोगनाशाश्रयवपटोविनष्टइतिप्रतीतिविषयोस्त्वित्यर्थः। इदमुपल
क्षणं। तेनस्वप्रतियोगिसंयोगाश्रयत्वसंबंधेनपटत्वादिघटकसंयोगोत्पत्ति
रेवउत्पन्नःपटइत्यादिप्रतीतिविषयोस्त्वियपिबोध्यं। प्राचीनवादिनिरासेना
तिरिक्तावयविनंव्यवस्थाप्यसांकर्तेघेति। एवमपि। अवयविनोत्पत्तिरिक्तेवपि।
ननुघटत्वादेर्नानात्वेसर्वत्रघटोयमितिनानुगतधीर्न्यात्। नस्याच्चघटादि
परस्यैकार्थत्वंप्रवृत्तिनिमित्तमेदादतआह। अनुगतधीरितिघटत्वादेर्मृत्वस्क

वर्णादिनासंकरपरिहारायैकस्यापिभेदंदर्शयति। यद्वेति। एकत्ववृत्तीति। तथाचन
मृत्वादिनासंकरइतिभावः। अवच्छेदकमिति। स्वाश्रयैकत्वसमवायित्वेनदंडवृत्तिदं
डत्वादिघटकारणतावच्छेदकतादृशसंबंधेनघटवृत्तित्वादंडकार्यतावच्छेदकमित्यर्थः।
विनिगमनाविरहादाहमृत्वादिकमेववेति। साक्षात्संबंधेनकार्यकारणाधर्मस्यैव
कार्यकारणतावच्छेदकत्वमुचितमन्यथातिप्रसंगात्। स्वाश्रयैकत्वसमवायिसंयु
क्तत्वेनघटत्वादेर्घटादिवृत्तित्वेनतंतुत्वादिकार्यतावच्छेदकत्वापातादित्या
शयेनाह। घटत्वादिकंवेति। तथाचघटत्वादिकंपार्थिवत्वव्याप्यमेवेतिनस्वर्ण
त्वादिनासंकरः। पाषाणत्वंचमृद्दिरोषप्रसवद्व्यत्वं। ननुजातिरितिनतेनापिपा
षाणघटेसंकरइतिभावः। कार्यकारणेति। घटत्वावच्छिन्नंप्रतिदंडत्वचक्रत्वा
दिनाबहुविधकार्यकारणभावानांसाक्षात्कार्यत्वादिसमानाधिकरणधर्मैरवच्छे

दौचित्यादित्यर्थः। ननुघटत्वस्यैकत्वेतदवच्छिन्नंप्रतिकुंभकारत्वादिनाहेतुत्वंनस्यात्।
तेनविनापिस्वर्णकारादेः स्वर्णघटोत्पत्तेरतआहकुंभकारेति। एकत्ववृत्तित्वेविनि
गमकाभावाच्छंकते। अथेति। रूपादाविति। घटत्वादेर्घटादिगतरूपादिवृत्तित्वे
घटगतशुक्लपटगतनीलेचपरस्परपरिहारेणावर्तमानयोर्घटेतिक्तत्वयो
र्घटगतनीलसांकर्यं। एवंघटगतमधुरेपटगततिक्तेचपरस्परपरिहारेणावर्तमा
नयोर्घटत्वतिक्तत्वयोर्घटगततिक्तेसांकर्यं। एवंघटगतमधुरेपटगततिक्तेच
एवंघटगतसौरभेपटगतासौरभेचपरस्परपरिहारेणावर्तमानयोर्घटत्वसौ
रभत्वयोर्घटगतसौरभेसांकर्यं। एवंघटगतसुकुमारेपटगतेकठिनेचपरस्प
रपरिहारेणावर्तमानयोर्घटत्वकठिनत्वयोर्घटगतकठिनेसांकर्यमित्यर्थः।
ननुगगनाद्यग्रहेवैतदनशाद्दिग्रहवदेकत्वाग्रहापेतद्वृत्तिघटत्वादिग्रहवाध

कामावश्यतोनव्यमतमाश्रित्यदूषणमाहएवकत्वेत्यादि। सकलैकव्यक्त्येकत्वस्यैकत्व
तद्घटित्वादिनियतानेकसमवेतजातित्वानुपपत्तिरितिभावः। सन्निकर्षः। घटत्वादि
ग्राहकसन्निकर्षः। तथाचैकत्वाग्रहेतद्घटित्वादिग्रहानानुपपन्नइतिनचग्रन्थ
कार्यंग्रन्थार्थः। नन्वन्यथानुपपत्तासन्निकर्षगौरवंमोहव्यमतआहघटत्वादिवादि
ति। तेनैवसन्निकर्षेणेतिशेषः। अतिरिक्तावयविसाधनमुपसंहरतीति। तस्मा
दिति। सन्निकर्षात्। संयुक्तसमवायात्। तत्तद्व्यक्तेरिति। तंतवादिव्यापारानंतर्य
तादित्यक्तरूपादविनाशंतंतुभेदादिमत्ययोनास्तितत्वादिषुतदभावोस्तीति
तदन्यथानुपपत्यावयवेभ्योतिरिक्तएवावयवीत्यर्थः। यद्यप्यग्न्यविनाशादि
रूपवैधर्म्यप्रयुक्तादवयवेभ्योभिद्यतेवयवीर्ह्यर्द्रात्तत्वादिविरुद्धधर्मप्रस
क्तत्वस्मादपिभिद्यतामित्याशंक्यनिराकरोति। अथादृत्तत्वेत्यारभ्यव्यवहारप्रा

माण्यमित्याहुरित्यंतेनग्रंथेन। परंपरासंबंधविषयकः। स्वाश्रयपाणिरसमवेतत्व
विषयकः। कंपाभावस्त्विति। अन्यत्रचरणादेरुत्पन्नएवकंपाभावः। शरीरकल्प्य
तइतिनतत्कल्पनेगौरवं। अधिकरणभेदेनावयवभेदानभ्युपगमादितिभावः।
अणुमात्रगतत्वेकर्मणःप्रत्यक्षत्वंनस्यादतआह। तद्धिमात्रेति। अन्यत्र।
पाणिशरीरादौ। परंपरासंबंधस्य। स्वाश्रयसमवायित्वादिसंबंधस्य। स्वस
त्यावयविक्रियो। दोषत्वे। प्रमाप्रतिबंधकत्वे। तदनापत्तेः। कर्मभावोपलंभाव
नापत्तेः। अस्तुवाशरीरादावयंतावयविन्येवेति। युक्तिसाम्यादाह किंचेति।
परंपरया। स्वाश्रयसमवेतत्वेन। किंचयाण्याद्यावयवेतितुल्ययुक्त्याशंकते।
अथेति। एवमुक्तेति। पाणावेवकंपःसएवपरंपरयाशरीरंप्रतीयतेननुतत्राव्या
प्यवृत्तिकर्मसाध्यसंयुक्तेत्यर्थः। अंभ्यवच्छेदेनेति। अवयवसंयोगएवपरंपरयाव

यावयवि किंचिदवच्छेदेनप्रतीयतेनवातिरिक्तः तदांश्ववच्छेदेनतंतुद्वयसंयोगात्पटोत्पत्ति
स्तंतौनस्यात्त्याच्चांशुधवयर्थः।असमवायिप्रतविजातीयसंयोगपटयोः सामाना
धिकरण्येनैवकार्यकारणभावात्। अतएवमूलेनचांशुसंयोगादंशावेवपटोत्पत्ति
रिक्तकमितिभावः।सविषयेति। व्याप्यवृत्तिमगवद्ज्ञानादिवृत्तिज्ञानत्वादिजाता
वव्याप्यवृत्तिजीवज्ञानादिवृत्तित्वस्यैवसत्वाद्व्यभिचारइतितद्वारणायसविषयावृ
त्तीति।जातिविशेषणं।सविषयावृत्तिसंयोगात्वादौव्याप्यवृत्तित्वस्यैवसत्वा
द्व्यभिचारइतितद्वारणायव्याप्यवृत्तीतिजातिविशेषणं। नचपरमाणुद्व्य
संयोगोव्याप्यवृत्तिरवतस्यनिरवयवद्व्यमात्रसमवेतत्वेनकिंचिदवच्छिन्नत्वा
संभवात्तथाचतमादायसंयोगात्वादौव्याप्यवृत्तिवृत्तित्वविशेषणमप्यस्तीति
व्यभिचारतादवस्थ्यमितिवाच्यं। तत्संयोगकिंचिद्विशेषणवावच्छेदकत्वोपगमेना

वच्छिन्नवृत्तिकत्वसंभवात्। यदिचतस्यनिरवयवद्व्यमात्रसमवेतत्वादनवच्छिन्नवृत्तिकत्वं
तदापरमाणुगगनसंयोगस्यापितथात्वेनानवच्छिन्नवृत्तिकतयाव्याप्यवृत्तित्वदुर्वारं।
नचतस्यापितथात्वमिष्टमेवेतिवाच्यं। तथासतिपरमाणुगगनसंयोगेगगनेव्याप्य
वृत्तिरितिव्यवहारापातादितिनकिंचिदेतत्। दंडकपालादिभिरसन्नेवघटादिः क्रिय
तइतिस्वसिद्धांतव्यवस्थापयितुमाह। इदमप्यत्रविचार्यतइति। इदंत्वार्थमाह।
किमसदित्यादिना। तदाहुरिति। सांख्यतत्वकौमुदीकृतइतिशेषः। स्वोक्तार्थसांख्य
वृद्धोक्तिमुपष्टंभकत्वेनदर्शयति। यथाहुरिति। नचपटादिरिति। व्यंजकइति। कार
णमित्यर्थः। यथाश्रुतेपटाद्यनुपलब्धिव्यंजकलाभादसंगतेरितिबोध्यं। ननुवि
जातीयावयवसंयोगस्यपटादिव्यंजकत्वेदीपादेरिवतत्कारणत्वानुपपत्तिरतआ
हविजायेति। तथाव्यंजकः। कारयागुणाभ्यः कार्यगुणोत्कर्षोजायतेपरिमाणा

दौ तथा थ तथादर्शनादिसंप्रदायेणशंकते । अथेति । एवं । अवयविनोवयवातिरिक्त
वे । नन्वेकत्रसंलग्नतृणादावसंतापकृष्टगुरुत्वसत्त्वात्तत्प्रयुक्तावनतिविशेषस्यसतो
प्यनुपलंभात्प्रयुक्तः । रातमाषकारब्धंतु रातमाषकगुरुत्वमपेक्ष्यात्कृष्टगुरुत्वसत्त्वा
त्तत्प्रयुक्तावनतिविशेषस्योपलंभः कथंनेयत आह । वयविनीति । तथाचकार्यगु
णेष्वुत्कर्षइतिनियमोगुरुत्वातिरिक्तगुणाएवेतिभावः । लाघवात्कल्पांतरमाह ।
स्कवेति । ननुगुरुत्वसापेक्षक्रियायावेगाजनकत्वेतंतुविश्लेषफलादधःसंयो
गजनकोत्तरोत्तरकर्मसंतानःकथंस्यादतआह गुरुत्वादेवेति । नचैवमिति । पर
माणुगुरुत्वजनितक्रियाजन्यवेगेनैवद्व्यणुकादौवेगारंभेत्यर्थः । परमाणुगु
रुत्वाधीनपातवेगाद्व्यणुकत्र्यणुकादौअनंतवेगस्वीकारेगौरवादाहअस्क
वेति । परंपरया । स्वाश्रयसमवेतत्वादिपरंपरया । संबंधाविशेषेणेति । गुरुत्वस्य

परमाणावेवसमवेतत्वेपिद्व्यणुकत्र्यणुकादौसर्वत्रपतननियामकस्वरूपसंबंधाविशेषेण
ति । स्कंनवेत्यर्थः । भेदाभेदनिराकरणायतमाशंकते । अथावयवायवादिनोरिति । या
निजशरीरार्थमाहशुक्रेति । शरीराविशेषे । मनुष्यादिशरीरे । अयोनिजशरीरसत्वेप्र
मत्स्यासंभवाच्छद्दप्रमाणायातिश्रूयतेहीति । मन्वादिशरीरस्ययोनिजत्ववाधकमा
हकिंचेति । शरीरस्यपांचभौतिकत्वेपृथिवीमाशंकतेअथेति । तथापि । शरीरमा
त्रयोनिजत्वासंभवेपि । तत्वंच । भूतचतुष्कप्रकृतिकत्वंच । तथापीत्यादि । प्राचांमते
स्पर्शविशेषनव्यमतेच मूर्तत्वव्याप्यजातिविशेषाद्द्व्यारंभकत्वादाकाशस्यनि
स्पर्शत्वेनमूर्तत्वेव्याप्यजातिविशेषाभावेनचद्द्व्यारंभकत्वानुपपत्तेः । नव्यम
तेनुद्द्व्योत्पादंप्रतिद्द्व्यसामान्याभावस्यहेतुत्वादाकाशानेकशरीरजानितेतस्य
तद्द्व्यत्वेनापरशरीरारंभकत्वानुपपत्तिरितिआकाशस्यक्वइतिभावः । आगमप्र

सिध्यापृथिव्यामाद्यरूपंकुरूपमेवरक्तादिकंतुपाकादेवसंभियायेणाह। कुरूपादीति। आदि
नाजलमुष्णादेः परिग्रहः। रसाद्यनुपपत्तेरिति। रसस्यद्रव्यप्रत्यक्षाहेतुतयातिक्तम धुरा
रध्यस्यनीरसत्वेपिक्षातीविरहेणनाहद्रव्यरसप्रत्यक्षस्यतुअवयवरसमादायो
पपत्तिसंभवेनचाचित्ररसानभ्युपगमात्पृथिवीजलाद्यारब्धेरसानुपपत्तिरेवगंधा
नुपपत्तिरित्यर्थः। अशक्यत्वादिति। इदंचनिर्गंधसगंधाभ्यामारब्धस्थूले। तत्रस्यो
रूपादेःप्रतिबंधकत्वात्। ननुनीलपीतादिरूपंयथाविजातीयंचित्रंजन्यतेतथा
पृथिवीजलादिभिरूपविजातीयंचित्रद्रव्यंतद्रूपादिभिश्चतत्रचित्ररूपादिस
म्पन्नं। इत्थंचपृथिव्यादेरन्यादितरद्रव्यप्रतिबंधकत्वमपिनकल्प्यतइतिनगौरव
मित्यरुचेराह। किंचपृथिवीति। पार्थिवाप्यशरीरादौपृथिवीत्वजलत्वादिनासं
कराच्छरीरत्वेनजातित्वरत्नत्वनिर्वचनमाह। शरीरत्वंचेति। चेष्टावदिति। चेष्टावे

दृत्तिरंशावयविनात्रसमवेताचजातिर्मनुष्यत्वादिरूपंसर्वत्रशरीरत्वमितिलक्षणसमन्वयः।
अचचेष्टाहिताहिताप्तीपरिहारार्थाक्रियानुकूलक्रियामात्रं। घटत्वमादायघटोतिव्याप्ति
नादवस्थापत्तेरितिबोध्यं। सत्ताद्रव्यत्वेति। अत्रहरूपत्वादिवारणंमत्यावयविपदेनैव। स
त्ताद्रव्यत्वादिवारणंचमात्रपदेनेतिविवेकः। जलत्वाद्यसंकीर्णायाइति। तथात्वजला
द्यारब्धसकलमांसलशरीरेष्वेकैकाजातिःस्वीकृतेति। अन्यथातत्राप्यनुगतमतेरनुप
पत्तेः। नचैवंतथापिपृथिवीजलादिमांसलशरीरेष्वनुगतमतेरनुपपन्नत्वंसाधारण
जातेरसत्वादन्यथाजलत्वादिनासांकर्यपरिहारादितिवाच्यं। पृथिव्यादिमांसल
शरीरेष्वस्मदादेर्घ्राणादीनांवाह्यगापदिंद्रियसन्निकर्षसंभवेननाहरानुगतमत्य
क्षसिद्धेरितिदिक्। तदाप्तोगोनि। भोगःसुखदुःखान्यतरसाक्षात्कारस्तस्यायतन
मवच्छेदकंनहीत्यवयवित्वरत्नत्वभिन्नजातिर्नरत्वविप्रत्वादिगोत्वाश्वत्वादि व

स्वपनसत्तादिस्तद्वत्वंतन्नेत्यास्तीतिविलक्षणसंगतिः। घटत्वादिवारणायाद्यविशेषणं
देयं। हस्तत्वादिवारणायाद्वितीयदेयं। नचापिसत्ताद्रव्यत्वादिवारणायमात्रप
दं। तदपितदितरावृत्तिपरं। नतुसकलतद्वृत्तितत्वार्थमपि। नरत्वादेः सकलांशावृत्
वृत्तित्वाभावेनासंभवेपातेरिति। घ्राणादेरपृथिवीत्वादिनासंकरादिदं द्र
व्यजातिरतस्तन्निर्वचनमाहइंद्रियत्वंचेति। ज्ञानजनकात्ममनोयोगस्यात्मनिस
त्तादितिव्याप्तिवारणायस्मृतिजनकेतिनथाचात्मनः संयोगस्यस्मृतिजनकत्वा
दतिव्याप्तिनिरासः। इत्थंचघ्राणमनः संयोगादिकमादायघ्राणादेर्लक्षण
संगतिः। तस्यहिदृष्टात्मनस्यपिस्मर्यर्थः। ननुयेनात्ममनोयोगेनस्मृतिर्नज
नितात्प्रत्यक्षादिकमेवजनितात्प्रत्यक्षादिकमेवजनितंतमादायात्मन्यतिव्याप्ति
रतद्वच्छेदकमाहस्मृतिस्वरूपायोग्यइति। एतद्विवक्षायाः फलंस्वमेवस्यइ

77

तिनातइति। आत्ममनोयोगस्यस्मृतियोग्यत्वंज्ञानसामान्यजनकविजातीया
त्ममनोयोगत्वेनैवनतुविशेषतः प्रयोजनाभावात्। तथाचकेवलप्रत्यक्षादिज
नकात्ममनोयोगस्यापिस्मृतिस्वरूपयोग्यत्वान्नमादायनात्मन्यतिव्याप्तिरिस
र्थः। नचैवंप्रत्यक्षजनकात्ममनोयोगादपिस्मृत्यापत्तिरितिवाच्यं। संस्का
रोद्बोधकादिसाचिव्याभावेनतत्तदनुत्पत्तेरितिध्येयं। मनाङ्नित्यसंयोगस्यवि
वक्षायाः फलमाहनवामनः प्रतियोगिकेति। स्फुष्टोकारणांतरविरहादज्ञा
नानुत्पत्तिसंभवेत्तज्जनः संयोगस्यनजन्यज्ञानत्वावच्छिन्नहेतुत्वंवाच्यमिसारा
येनाशंकतेअथेति। तज्जनः संयोगस्यजन्यज्ञानहेतुत्वसिध्यर्थंस्फुष्टावनुमि
त्यात्तिमाशंक्यनिषेधतीनचेति। आत्ममनः संयोगनाशकालपरामर्शीत्यति
व्याप्तिंविनश्यदवस्थेतत्संयोगएवतत्परामर्शसमवायीतिसूचनाय। स्फुष्टि

समकालमात्ममनोयोगोत्पत्तिवर्णनमनुमित्यसमवायिसंयोगसत्वसूचनायेतिवो
ध्यं। मतांतरमाहुरकालइति। आत्ममनःसंयोगनाशकालइत्यर्थः। अथस्यादिना
हेतुंजन्यज्ञानत्वावच्छिन्नेतदुभयनःसंयोगहेतुत्वखंडननिरस्यति। नतत्कालइति
सुषुप्तिकालइत्यर्थः। विशेषगुणोपधाननेव। तद्विशिष्टेनेव। आत्ममान
सेतद्गुणकारणत्वकल्पनगौरवादाह। विशेषगुणेति। ननुतदुभयनोयोगोनज
न्यज्ञानमात्रेहेतुः। रासनादिकालेगुडादेस्त्वाचप्रत्यक्षापातादुच्यतइति
त्वगिंद्रियाधिष्ठानत्वंचर्मत्वंनतुजातिस्तेजस्त्वादिनासंकरादतस्तद्घटितच
र्ममनोयोगत्वेनजन्यज्ञानकरणत्वगौरवमित्याशयवानाशंकते। चर्मत्वमि
ति। तथापिमानसत्वावच्छिन्नएवेति। तावतैवसुषुप्तावात्ममानसस्यवारणा
दितिभावः। नतुजन्येति। प्रयोजनाविरहादितिभावः। आयुष्यतेतिनिंद्यर्थम

तुष्। मतांतरमाहुरमनेति। जन्यज्ञानत्वावच्छिन्नेतदुभयनोयोगस्यहेतुत्वमप्युपेत्यरासनाद्य
त्पत्तिकालेतत्त्वोत्पत्तिवारणायरसनमनोयोगादेस्त्वाचप्रतिबंधकत्वकल्पनेनतुमहागौर
वमित्यर्थः। नन्वनन्यगत्यामहागौरवंवरीवर्त्तव्यं अतआहजन्यज्ञानत्वेति। तस्यजन्यज्ञा
नत्वस्य। नानात्वात्। अनन्यथासिद्धिमित्यतएवाद्यावैलक्षण्यजन्यत्वघटितत्वेननानात्वा
त्। जन्यप्रत्यक्षत्वेति। इंद्रियजन्यतावच्छेदकतयासिद्धजन्यप्रत्यक्षत्वस्य जातित्वात्तद्घ
टितेनेतदुभयनोयोगस्येहेतुत्वेनगौरवं। नचनानाकार्यकारणभावइतिभावः अन्ये
त्वत्रसबीजंतुसुषुप्तात्ममानसचारणायमानसत्वावच्छिन्नएकएवोभयनोयोगस्येह
तुकल्पनमुचितं। नतुजन्यप्रत्यक्षत्वावच्छिन्नेत्याहुःतादावपि। तस्येहेतुत्वप्रसक्तत्यागो
रवादिति। तदुभयनोयोगस्यजन्यज्ञानत्वावच्छिन्नंमानसत्वावच्छिन्नंवाप्रतिहेतुत्वंखंड
यति। यत्कश्चिदिति। ननुसुषुप्तौविजातीयात्ममनोयोगात्सर्वेष्वासप्रश्वासयहेतुजीव

मयोगो ज्ञानोत्पादनस्यादतआह जीवनयत्नस्येति। यदेति। यदा मम मनस्संयोगस्संस्कारपरि
हतपुरीतति तिष्ठति तदा सुप्तिरित्यर्थः। ज्ञानादाविव जीवनयत्नेऽपि विजातीयात्मम
नोयोगे नहतुत्वपक्षे सुप्तावात्ममानसयोगनिवारणायकल्यान्तरमाह चेत्रीयेति सुप्तौ।
चेत्रीयज्ञानाभावान्नतदा चेत्रस्य स्वात्ममानसेन वाजागरे परमात्ममानसे। परा
त्मनिचेत्रीयज्ञानाभावादिति भावः। इदंतुजन्यज्ञानत्वावच्छिन्नत्वऽप्रनोयोगहतुत्व
खंडनंतु। ज्ञानेति। मनःसंयोगवयात्मनि अतिव्याप्तिवारणायज्ञानाकरणेति संयो
गविशेषणंतादृश समानाधिकरणेति मनःसंयोगविशेषणं। तादृशमनः
संयोगवतिकालादाघतिव्याप्तिवारणायज्ञानकरणेतिसंयोगविशेषणं।
तादृशावच्छेदकघटसंयोगमादायघटेतिव्याप्तिवारणायमनःपदमिति। शरी
रमनोयोगस्यज्ञानकारणत्वमाशंक्यशरीरेतिव्याप्तिवारणायाहत्वत्स्येति।
ननुसमवायेनशरीरमनोयोगस्यावच्छेदकतयाजन्यज्ञानत्वावच्छिन्नहतुत्वम

वश्यंवाच्यं। अन्यथात्वऽमनःसंयोगादिसकलकारणसत्वे घटाद्यवच्छेदेनाप्यात्म
निज्ञानोत्पत्तेः। तथाचशरीरमनोयोगमादायज्ञानासमानाधिकरणज्ञान
कारणसंयोगाश्रयत्वस्यशरीरसत्वादतिव्याप्तिर्दुर्वारस्तआहयदिचेति। तदा
ज्ञानेति। ज्ञानसमानाधिकरणज्ञानकरणसंयोगः शरीरनिष्ठकार्यकारणाप
क्षशरीरमनोयोगः आत्मनि कार्यकारणभावपक्षेचात्ममनोयोगोपितदना
श्रयवृत्तिर्मनोवृत्तिर्भवेद्योज्ञानकारणसंयोगोघ्राणमनःसंयोगादिरेवतदाश्र
यत्वस्यघ्राणादेसत्वात्संगतिः। नचघ्राणमनःसंयोगादिरपिज्ञानसमानाधि
करणज्ञानकारणीभूतात्ममनोयोगाद्यश्रयमनोवृत्तित्वाच्चतदनाश्रयवृत्ति
रितिवाच्यं। घ्राणादिकमादायतादृशसंयोगानाश्रयवृत्तित्वस्यापितत्रसत्वात्।
तादृशसंयोगानाश्रयमात्रवृत्तित्वस्यवाविवक्षितत्वादितिदिक्। तृतीयंविधामो

हविषयस्तिति। अत्रविषयत्वलौकिकसाक्षात्क्रियमाणतयाभोगधानत्वमुक्तं। इदंचघटप
टादीनांद्व्यणुकादीन्द्रियस्यतुनिरुक्तविषयोपादानत्वेनगौणं। नभसोपितादृशज्ञानाश्री
पादानत्वेनगौणं। विषयत्वमिष्टमेव। यद्वानित्यत्वेसतिसाक्षात्परंपरयावाभोगसाध
नत्वंतत्वमितिनकापिक्षतिरिति। अत्रयद्यपीत्यादि। कामुकशरीरयोःपरस्परंभोग
साधनत्वाच्छरीरस्यापिविषयत्वमितिभावः। शरीरत्वेनेति। चंदनादिविषयसत्वेपि
शरीरंविनाभोगानुत्पत्तेस्तस्यशरीरत्वेनापिपृथक्पुरुषार्थसाधनत्वमस्तीतितेन
रूपेणापृथक्निरूपणं। एवमिंद्रियस्यापींद्रियत्वेनपृथक्निरूपणमितिभावः।
ननुशरीरादौनिरूपितेपितद्वयवमांसास्रुगादीनामनिरूपणान्न्यूनत्वमतआ
ह। अत्रशरीरेति। वज्रस्यपार्थिवत्वंव्यवस्थापयितुमाक्षिपतिवज्रमिति। तद्ग्रहणी
तिमण्यादिग्रहणमितिशेषः। यद्व्ययद्व्यध्वंसजन्यंतद्व्यंतद्व्योपादानोपादेयमि

तिन्यायेनस्वाश्रयसमानजातीयारंभकपरमाणुवारब्धत्वसिध्यामण्योदर्गंधवत्वमितिभावः। आप्ये
पंनिरस्यतिनस्यादवेति। यत्रयोजकत्वात्। लोहलेख्यत्वप्रयोजकत्वात्। घृतादेरपिपा
र्थिवत्वंव्यवस्थापयितुमाक्षिपति। घृतेति। आप्येपंनिरस्यतिनभस्मीभावादिति।
तत्रतैलादिषु। तैलत्वादिकंमिसादिनाघृतवत्वसात्वयोःसंग्रहः। आचार्यमनमाह
यद्वीतिबीजेति। बीजंतिलादितत्प्रभवस्नेहवत्वंतैलत्वं। क्षीरप्रभवस्नेहवत्वंघृतत्वं।
मांसप्रभवस्नेहवत्वंवसात्वं। नतुजातिविशेषइत्यर्थः। नुनंबीजइवारेस्तैलादीष्ट
मेवैतदाहप्रभवत्वादीति। पृथिवीनिरूप्यक्रमप्राप्ताअथोनिरूपयतीजलमि
त्यादि। गुणविरोधेनेति। मधुरेणमधुरणवारभ्यतेनतुतिक्तादिरूपेवंतिक्तेनाति
क्तेवारभ्यतेतनुमधुरादिरन्यथामधुरारंभेतिक्तादापत्तेरितिगुणाविरोधेनेति।
क्रममधुराद्यारंभाहरीतकीनिरसेव। चित्ररसनानाभावस्तूपरागुक्तस्मर्तव्यइत्यर्थः।

षड्रसेति। मधुरतिक्तादिषड्रसकार्ये पुष्टिपित्तादिनाशादितत्कारित्वादित्यर्थः। परंपरया
समवायिसमवेतत्वेन। तदाहरीकीनिभक्षणोत्तरंजलंमाधुर्यमुपलभ्यकाले। ननुयदि
जलेहरीतकीभक्षणाद्व्यंग्यंमाधुर्यं स्वीक्रियतेतर्हिकर्कटकी भक्षणाद्व्यंग्यमम्लत्वमपि
स्वीक्रियतामतआह। कर्कटीति। एतेनत्यादि। वक्ष्यमाणास्वरसादाह। किंचनिदा
घेति। एतेन। किंचेत्यादियुक्तिवलेन। नक्षतिः। अपिमुद्गइति। नचवह्न्यादौमुद्गश
र्करादियोगे धूमोत्पत्तेः प्रसक्तासिद्धत्वात्तत्रार्द्रत्वमावश्यकं। धूमस्यार्द्रेधन
प्रभवत्वनियमात्तथाचदृष्टव्यांजलोपाधिकमेवमाधुर्यंनतुस्वाभाविकमि
तिवाच्यं। जलमाधुर्यस्याविष्टतयादुग्धशर्करादौविलक्षणमाधुर्यस्यान्य
थानुपपत्तेस्तत्रतन्नजातीयमाधुर्यस्यावश्यकत्वादितिभावः। श्रीखंडादि
दृष्टेव्यांशीतस्पर्शेविवक्षेदापनियमांतरमाह तथाशीतेति। ननुशीतेरू

पस्यसंहत्यनवस्रवसातिस्नायत्वंकिंनुउत्कृष्टोब्राह्मणइत्यादिवत्तत्तद्द्रव्ययोपाधिकमि
सरूचराहकिंचेतस्यति। स्निग्धत्वेति। स्निग्धत्वावच्छिन्नेक्षुतैलवसादौसर्वत्राप्येकजा
तीयोगुणविशेषोनियामकोवाच्यः। सचानुस्रवबाधान्नसंभवति। अथापिय
दिनियमत्वेनकथंचित्कल्प्यतेतदाचसएवस्नेहस्यचपृथिवीविशेषगुणत्वाभावः
पूर्वमिवदर्शितइतिभावः। ननुतृणादध्यादेः क्षीरत्वादिकमिष्टमेव। नचतृणादौ
क्षीरत्वाद्यपलंभापत्तिः। तद्व्यंजकः सरसादेस्तत्रविरहेणानुपलंभासंभवादि
त्याशंक्याह। किंचेवमिति। सांकर्यमिति। क्षीरानारंभकतृणेपिण्याकारंभक्षीरे
वमिथः परिहारेणावर्तमानयोस्तृणत्वक्षीरत्वयोः क्षीरारंभकतृणानदत्वयवा
दौसांकर्यापत्तिरित्यर्थः। तृणेति। तृणस्यापरमाणवंतसंगतेरेवपरमाणुषि
द्व्यणुकादिक्रमेणक्षीरारंभात्तृणक्षीरयोरेकपरमाणावारब्धत्वमविरुद्धं। यद्

DR. BHAU DAJI LAD MUSEUM

यंगद्रव्यध्वंसजन्यंतद्द्रव्यंनद्रव्योपादानोपादेयमाद्यपटध्वंसजन्यखंडपटवदितिव्य
भिरितिभावः। तन्नियामकस्य। दण्डाद्यौरत्वादिनियामकस्य। पृथिवीमात्रइति। पृथिवी
विशेषगुणस्पर्शवत्पृथिवीद्रव्यत्वनियमात्पृथिवीमात्रसमवायित्वमित्यर्थः। ननुजलीय
एवपरमाणुरूपादौतत्प्रतीतेःकथमियतआह। तत्रेति। तेलादावित्यर्थः। जलीय
स्नेहसाधकंमतमाह यत्त्विति। लक्षितंजलंविसृजतेतत्वेति। अनुमेयमिति। अनि
त्यस्नेहसमवायिकारणतावच्छेदकतयासिद्धंजलत्वंपरमाणुवृत्ति। स्पर्शविद्रव्य
द्रव्यत्वसाक्षाद्व्याप्यजातित्वात्पृथिवीत्ववदित्यनुमानंबोध्यमित्यर्थः। आमत्वा
दौव्यभिचारवारणायस्पर्शविद्वृत्तीति। घटत्वादौतद्वारणायद्रव्यत्वसाक्षाद्व्याप्ये
ति। जातियद्रूपेणधर्मित्वोक्तौकार्यद्रव्यत्वादौव्यभिचारद्वारणायजातित्वादि
तिहेतुविवेकः। फलोपधानापत्तेः। अनित्यस्नेहोपधानापत्तेः। फलोत्पादः। अ

नित्यस्पर्शानुत्पादः। ननुजलादिपरमाणोःपाकादेवस्पर्शोत्पत्तिरुक्तेत्यतआह पाक
जेति। सदास्पर्शेति। जलादिपरमाणुस्पर्शस्यनित्यतयातत्रस्पर्शसामान्याभावस्यहे
तोरसत्त्वान्नानित्यस्पर्शोत्पादइतिभावः। शंकते। अथेति। एवमिति अनित्यस्पर्शस
मवायिकारणतावच्छेदकजातेर्जलादिपरमाणोरसत्त्वेपिफलानुत्पादस्यासमवायि
कारणाविरहप्रयुक्तस्नेहद्रव्यत्वमेवानित्यस्पर्शसमवायितावच्छेदकमस्तु। जलादिपरमा
णुगगनादौस्नेहाद्यनुत्पादस्यतत्समवायिविरहादेवोपपत्तिरितिकिंजलत्वादिजा
त्येतितुल्यलाभमित्यर्थः। प्रसंगादत्रैवलाघवेनजलत्वादित्रयंसाधयति। जलत्वने
जलत्वेइत्यादि। भिन्नप्रयत्ननेतेजस्त्ववायुत्वयोःसाधनेगौरवंस्यादितिभावः।
समनियतयोग्येति। नचानित्यस्नेहादिसमवायिकारणतावच्छेदकजलत्वाद्य
वच्छिन्नसमवायिकारणतावच्छेदकतयासिद्धेजातेःपरमाणुसाधारणत्वेप्यंत्या

वयविजलाद्यविनित्वात्कर्यंतजात्योः समानियतयोग्यवृत्तिकत्वमितिवाच्यं। पार्थिवस्यघ
टादेरेवकस्यचिज्जलादेरप्यवयवित्वाप्रसिद्धेरतएवास्वरसादाहव्यंजकाश्रयदाह्येति। द्वि
धस्यापिजलत्वादेः शीतस्पर्शादिरेवव्यंजकइतितदभेदादित्यर्थइतिभावादितिवाध्यं। न
न्वनियतस्नेहादिसमवायिकारणतावच्छेदकजलत्वादेरेवजलादिपदवृत्तिनिमित्तत्व
मायुपेत्यपरमाणुवृत्तित्वमेवकल्प्यतांकिंतदवच्छिन्नसमवायिकारणतावच्छेदक
जात्यंतरस्यपरमाणुसाधारण्यकल्पनेनेयतआहकिंचेति। जलत्वादिकं। अनियत
स्नेहादिसमवायिकारणतावच्छेदकजलत्वादिकंसङ्कीर्णहितामिति। तथाचजात्यंत
रंनकल्पतइतिभावः। तदेव। परमाणुसाधारण्यजात्यंतरमेवपरमाणवसाधारण्य
जलत्वादर्जलादिप्रवृत्तिनिमित्तत्वपरमाणौजलादिपदप्रयोगोनस्यादितिभावः।
मूर्तत्वजातिसद्भावेस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्यद्रव्यत्वव्याप्यजात्

व्याप्यत्वेसतिद्रव्यत्वव्याप्यत्वरूपस्यजलत्वादौपक्षेमूर्तत्वजातिव्याप्यत्वात्। स्वरूपासि
द्धिःस्यादतआह। मूर्तत्वजात्यभावइति। तथाचमूर्तत्वस्यजातित्वाभावएवायंहेतुरिति
नस्वरूपासिद्धिरितिभावः। तत्सत्वे। मूर्तत्वजातिसत्वेक्रियासमवायिकारणतावच्छेद
कतयातत्सिद्धेरितिभावः। सिद्धेरिति। जलत्वादिकंपरमाणुजन्यवृत्तिजलत्वादिव्या
पकजातित्वात्। द्रव्यत्वत्वत्स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात्मूर्तत्वसाक्षा
द्व्याप्यजातित्वाद्वापृथिवीत्ववदित्यनुमाननपरमाणुवृत्तित्वसिद्धिरित्यर्थः। अत्रमध्य
महतौस्पर्शवद्वृत्तीतिजातिविशेषणामात्मत्वेव्यभिचारवारणायघटत्वादीतद्वार
णायोभयत्रापिसाक्षादितिबोध्यं। कश्चिन्नुइत्याहेत्यस्वरसोद्भावनंतद्दूषणंतूक्ता
नुमानस्याप्रयोजकत्वमिति। आद्यद्व्यणुकमेवेति। अत्रजलादिपरमाणावेवपृ
थिवीपरमाणावपिरूपरसादिकंनित्यंतद्द्व्यणुकादौविजातीयानेकरूपरसादि

मत्वंतुपाकजं। फलबलेनतत्रैव पाककल्पनात्। अन्यथागंधनीलादि समवायिकारण
तावच्छेदकतयासिद्ध पृथिवीत्वस्यपरमाणुवृत्तित्वेबाधकाभावाद्द्व्यणुकमेवपृथि
वीत्वादिवदिखादिमूलव्याघातापत्तेरितिभावः। केचित्तुइक्षादुरसरसबीजलपृथि
वीत्वजलत्वादेः परमाणुवृत्तित्वेतत्रपृथिवीजलादिव्यवहारानुपपत्तिरिति। ननु
जलीयशरीरस्यनित्यत्वेवरुणलोकस्यसर्वदासत्वाद्वारुणंयागादोवरुणलो
कप्राप्तिफलकत्वश्रुतिरुध्येतेयतआह। वरुणलोकप्राप्तिरिति। एतेन। जली
यशरीरनित्यत्ववर्णनेन। व्याख्यातं। अभियुक्तयासाधितं। ननुरसनस्यरस्य।
हकत्वेपित्ताद्यभिभवदशायामपिनेनरसग्राहकस्यादत आह एथिव्याद्यनुभिम्
तेरिति॥ ॥ क्रमप्राप्तंतेजोलक्षयतितेजइति। ननुतेजसशरीरस्यसर्वदाजाज
ल्यमानत्वात्कथंउपभोगक्षमत्वमत आह पार्थिवस्यवेति। यथाजाज्वल्यमान

स्यापिरूपवर्णस्यपार्थिवभागोपसंक्षादुपभोगक्षमत्वंतथास्यापीतिभावः। चक्षुषः का
चाद्यभिभवदशायांरूपादिग्रहणवारणायाह। इंद्रियाद्यनभिभूतैरिति। चक्षुषस्ते
जसत्वेपूर्वपक्षमाह। अत्रकेचिदिति। नप्राप्यकारि। नसंबध्यार्थग्राहकं। ननुचक्षुषः
संबद्धार्थग्राहकत्वशास्त्रात्इदमसोर्थग्रहणायोगपद्याभिमानः कालसान्निकर्षादपि
नसंभवति। तयोरतिव्यवहितत्वेनतस्याप्यसंभवादित्यतआह। अत्यंतमोहीति। वे
गातिशयेआचार्योक्तिसुदाहरणंयथा। पश्चाचीनाचलचूडावलंबिन्येवमर्क
खमालिनिभुवनोदरेबालोकइति। चक्षुषःप्राप्यकारित्वंतन्नदूषणानिरासेनसा
धयित्वाप्राप्यकारित्वेबाधकमप्याह। किंचचक्षुषइति। आग्निविघातकतयेव। सं
बंधविघातकतयेव। बौद्धमतंखंडयितुमाहयाज्ञिकेति। तत्राग्निलादि व्यवहितस्तु
ले। अतिशयेति। प्रसक्तजननयोग्यत्वात्सकातिशयजनकत्वतादृशातिशयविशि

द्रव्यजनकतामिति यावदित्यर्थः। एतेनेश्वरनित्यत्वमतेऽपि व्यवहितस्यातिशयजनककाले सत्त्वात्सहकारिभिस्तज्जननमिति शंकाप्रत्युक्तमपास्तं। सहकारिभिरतिशयविशिष्टद्रव्यस्यैवोत्पादांगीकारात्। नाप्रयासम्भवादिति। अन्यथा व्यवहितेऽपि सहकारिभिरतिशयोत्पादस्यादितिभावः। परेति। तद्भिन्नेति। चिंताबीजंस्वयमेवस्फुटयति। चक्षुःसंयोगत्वादिनेति। चक्षुष्टेर्जातित्वेनचक्षुःसंयोगत्वादिनाचाक्षादिहेतुत्वेलाघवं। गोलकत्वस्यपार्थिवाप्यादिसाधारणस्यजलत्वादिनासंकरेणजातित्वाभावात्तदवच्छिन्नसंयोगत्वादिनाहेतुत्वेगौरवमित्यर्थः। फलमुखेति। फलं। तादृशकार्यकारणभावग्रहोमुखमुपस्थितिर्बीजंयस्यतादृशगौरवस्यानंतचक्षुरादिकल्पनागौरवस्थेत्यर्थः। घ्राणादिपंचकंद्रव्यांतरमेवनतुपृथिव्याद्यारब्धमितिआक्षिपति। स्यादेतदिति। एकदेशिमतंदूषयतिउक्तेति।

नुमानमेवेति। घ्राणादेःपृथिवीत्वादिसाधकानुमानमेवेत्यर्थः। ननूक्तानुमानस्याप्रयोजकत्वात्कथंवानिगमकत्वंअतआह अणुरिति। अणुरपिविशेषोध्रुवसायकरइतिन्यायादित्यर्थः। अत्र। घ्राणादेःपृथिवीत्वादौ। श्रुतेति। सूर्यरश्मिर्गमयतादित्यादितत्तच्छ्रुतेरित्यर्थः। सजातीयहेतावेवसजातीयकार्यलयस्योचितत्वादितिभावः। बलवत्सजातीयेति। अत्रमात्रपदेनबलवत्सजातीयग्रहणाद्दृताग्रहणस्यापिसमत्वव्यवच्छेदः॥ ॥क्रमप्राप्तंवायुंलक्षयति। वायुरिति। ननुवायवीयशरीरस्यसर्वदाकंपशीलत्वात्कथमुपलंभगम्यत्वमतआह। पार्थिवावयवेति। व्यगिंद्रियस्यकुड्याद्यभिभवदशायांस्पर्शादिग्रहणावारणायाह पृथिव्याद्यनभिभूतेरिति। नायोनिरूपके। नप्रयत्नासंभवादाहस्पर्शलिंगकेति। तस्यासाधारणंस्वभावमाह तिर्यग्गमनेति। एतस्यतिर्यग्गम

नस्पभावत्वंवायुत्वादवनातिनिबंधनधर्मस्यैवस्वभावत्वादितिभावः। एतस्यासाधारणं
प्रयोजनमाह पत्रपाल्विति। उक्तंस्पर्शादिलिंगकत्वंव्युत्पादयतितथाहीत्यादि। वायुः
पृथिव्येवनद्व्यांतरमित्याक्षेपंमनसिधृत्वाशंकते। अथेति। असिद्धेः। गुरुत्वाभा
वासिद्धेः। ननुवायोर्गुरुत्वेपतनस्यादतआह। पतनाभावाच्चेति। अन्यथा। वायोः
पतनाभावादवद्व्यांतरत्वे। तुल्यमिति। धर्मिकल्पनइतिन्यायेनवायूपनीतजला
दिभागानांद्व्यांतरत्वकल्पनेगौरवाज्जलत्वादिकमेवयदिनदावायोरपिद्व्यां
तरत्वकल्पनेगौरवात्पृथिवीत्वमेवकल्प्यतामितितुल्यत्वमित्यर्थः। धृतिरपि। न
भस्मितृणादीनांधृतिरपि। पृथिवीविरोधेति। विरोधपदोपादानाद्घटादि पृथिवी
संयोगात्पतृणादिधृतिः स्यादितिनिरस्तं। कंपोपीति। गुरुत्वादिकंपोपि पृथि
वीविरोधसंयोगात्प्रयत्नवदीश्वरसंयोगादेववास्यादित्यर्थः। जठरानलयेंदिति
व

यथाकश्चित्तेजोविरोधांतः शरीरसंचारीसन्जठरानलइत्युच्यतेतथापृथिवीविरोधए
वकश्चिदंतः शरीरसंचारीप्राणइत्युच्यते। एवंपृथिवीविरोधएवकश्चित्वायुरित्युच्यते। ननु
तदुभयारंभकंकिंचिद्द्रव्यांतरंजातियुक्तंद्रव्यमस्तीतिभावः। पूर्वपक्षिणाप्रागुक्तरीत्यावर्णितं
वायोः पृथिव्यंतर्भावंनिरस्यति। मतांतरमाह। अयंततेति। प्रथमोक्तायुक्तिंदूषयति।
किंचपार्थिवेति। नैवं। नोद्भूतस्पर्शसमनैयायिकं। संप्रदायमतमुक्त्वान्यमतमाह। अत्र
नवाइत्यादि। तथापिवायोः पृथिवीत्वेउक्तदूषणानामुद्धारेपि। अन्यथा। साधका
वेपिवायोः पृथिवीत्वस्वीकारेपृथिवीविरोधस्यैववायुत्वजातिमत्त्वमित्युक्तंप्राक्।
अधुनातुसर्वेपृथिव्यावायुत्वजातिमत्त्वमास्तियाशंक्यनिषेधति। नचैवमिति। य
द्यनुष्णाशीतस्पर्शसमवायितावच्छेदकंतयासिद्धंपृथिवीत्वमेवगंधसमवायितावच्छेदकंतदातिर्यग्गतिसमवायितावच्छेदकमपितदवास्कनत्वातिरिक्तवायुत्वंगौरवात्।

रूपंचयदेववायुत्वंतदेवपृथिवीत्वंघटत्वकलशादिवदित्येवकिंनरोचयसीतिनिखिलार्थः।
असतिप्रतिबंधके।असतीच्छादिप्रतिबंधके।तज्जातिमन्मात्रवृत्तित्वेपृथिवीत्वजाति
मन्मात्रवृत्तित्वे।तत्र।तिर्यग्गमने।असाधारणेति।पृथिवीत्वावच्छिन्नभिन्नस्य प्रयोज
कत्वाकल्पनादित्यर्थः।तदापत्तेः।तिर्यग्गमनापत्तेः।दूषणांतरमाहपृथिवीसंज्ञेति।
यदियदेववायुत्वंतदेवपृथिवीत्वंतदाघटादौसर्वत्रापिपृथिवीतिवायुरितिच।सं
ज्ञाद्वयमपिस्यादिसाक्षेपस्यानुद्धारायेत्यर्थः।नन्वेकत्रघटकलशादिसंज्ञावत्पृथिवी
वायुसंज्ञापीष्टवेतिकथमयमाक्षेपइत्यतआह।विभागाधिकरण्येति।वायुत्वए
थिवीत्वयोरेकत्वेपृथिव्युद्देशानेववायोरप्युद्देशान्नवधाद्व्यवहारोनुपपन्नइत्ये
वताद्दशाक्षेपउद्धार्यः।पृथिवीत्वस्यैकत्वान्नैववैजात्यवायुःस्यादितुल्य
मितिवायो।पृथिवीत्वमेवाङ्गीकरिष्यतीतिचेत्।तथापि।अनुष्णाशीतस्पर्श

जातित्वाभावेनार्थसमाजसिद्धेरपि।तद्धीति।यदिह्येकत्वलाघवात्पृथिवीत्वेनवि
जातीयवायुस्पर्शहेतुत्वंतर्हिजलत्वादिनापितद्धेतुत्वापत्तिस्तस्यापिह्येकत्वादिमि
जलत्वादिकमेववायोःस्यादितिशावः।ननुपृथिवीत्वस्यप्रत्यक्षह्येकत्वान्नदेववायोः
कल्पयांतरत्वतिरिक्तद्रव्यत्वमित्यतआह।तिर्यग्गतीति।तथाचवायुत्वमेवपृथिव्याः
किंनस्यादितिवैपरीत्यंदुर्वारमितिभावः।यद्यपिशरीरेप्राणवदपानादेरपिवायुका
र्यतयावह्येकत्वेतत्रैवशरीरेपंचवायवइतिप्रसिद्धेस्तथापिमूर्तयोःसमानदे
शाविरोधादेकत्रवायुपंचकस्यासंभवादन्यथेवतांप्रसिद्धिमुपपादयतिस्वैवैक्ए
मिति।तथाचैकस्यैवपुंसःपाकादिक्रियाभेदात्पाचकपाकादिसंज्ञाभेदवदेक
वायोरेवतत्तत्क्रियाभेदात्प्राणापानादिसंज्ञाभेदइतिभावः।यद्यप्येकत्रैवावच्छे
दकभेदेननानाविहगवृत्तिर्नस्यात्।अतएवहृदिप्राणोगुदेपानइत्यादिनामलिं

गानुशासनमपिसंगच्छते। तथाप्येकस्यतत्तत्संबंधनैवोपपत्तौएकशरीरनानात्व
युक्तकल्पनेगौरवमबाधकमितिमंतव्यं॥ ॥ क्रमप्राप्तमाकाशंनिरूपयति। आकाश
इति। आकाशत्वादिति। अत्रयन्नेतरभ्यामिद्यतेनतदाकारायमाणेधिन्यादि। नचायं
तथा। तस्मादितरभ्यामिद्यते। इत्कदाहरणोपनयनिगमनानिबाह्यमाने। यदि च।
नामेति। द्वादशाहनिरूपितनामकुर्यादित्यादिशास्त्रप्रतिपादितनामकरणसंस्कारा
धीनइत्यर्थः। तदनधीनेति। नामकरणसंस्कारानधीनेत्यर्थः। तदधीनेति। नाम
करणसंस्कारधीनेत्यर्थः। एतन्मते। भाष्यकृन्मते। यथायशुक्लतादिरिति। लोम
वल्लोमत्वलक्षणरूपपशुत्वस्यबहिरिंद्रियग्राह्यविशेषगुणवत्त्वरूपमूर्तत्वस्यापा
धरनुगतत्वादितिभावः। आकाशादीति। राहुत्वंराहुसमवायिकारणत्वमस
द्व्यातिरिक्तद्रव्यत्वंवाकाशत्वमवांतरजातीयपरत्वापरत्वभिन्नत्वमघट्टमाति

रिक्तद्रव्यत्वंवाकालत्वमेवंदिक्कादीतितदुपाधेरननुगतत्वादाकाशादिसंज्ञाननिरूढो
पाधिकीत्यर्थः। यथाचैत्रेत्यादि। चैत्रशब्दवाच्येषुविलक्षणाविलक्षणापिंडेषुचैत्रत्वसे
कस्यासंभवान्नात्व। एवंमैत्रत्वादरपि। एवमाकाशत्वादरपि पूर्वोक्तरीत्यानानात्व
मितिचेन्नादिसंज्ञायामनुगतप्रवृत्तिनिमित्तस्यान्यसंकेतवत्वात्पारिभाषिकत्वमि
त्यर्थः। संज्ञांलक्षयतिसंज्ञाचेति। संकेतवदित्यस्यव्यावर्त्यमाह। शास्त्रज्ञानेति। कु
र्वन्कुर्वाणइत्यादिषुयौगिकत्वनसंकेतवत्त्वाभावान्नातिव्याप्तिः। अन्यथातेषुसं
केतवत्त्वस्य। अर्थवद्धातुरप्राप्तिपदकमितिनिरूढप्रातिपदिकत्वस्यचसत्त्वादति
व्याप्तिर्वज्वलेपाचितेवस्यात्। नचकुर्वन्कुर्वाणइत्यादिषुसंकेतवत्त्वाभावार्थंचैत्व
मवकुतइतिवाच्यं। प्रातिपदिकत्वनिरूढार्थवदित्यनेनाकालत्वादिसाधारणा
र्थवत्त्वस्यैवाभिहितत्वात्। अन्यथावाचकेषुद्विरेफादिपदेषुअर्थवत्त्वाभावतदु

क्षणाव्याप्तिः स्यात्। नचैवं प्रातिपदिकलक्षणेऽर्थवदित्यस्याव्यर्थत्वमिति वाच्यं
नायैचनदुपादानात्। अथातुरप्रत्ययइत्येतयोः क्रमेणाव्याप्तिमाह। धातुप्रत्ययपरयोश्चेति।
करणेति। साधकतमंकरणं। आधाराधिकरणं। स्वतन्त्रः कर्ताकर्तुरीप्सिततमं कर्म। कर्म त
णायमभिप्रैतिसंप्रदानं। ध्रुवमपायेपादानं। इत्याधनुशासनात्कारणादयः शब्दा
स्तत्तत्कारकविशेषसंकेतिताएवेतिनतेषांसंज्ञात्वसातिरितिभावः। ननुपाचकादि
योगिकानामपिसंकेतभेदन्यत्वोत्संज्ञात्वंनस्यादित्याशंकामिश्रा परास्यापरिहरति। पा
चकेति। लौकिकप्रसिद्धिमनुरुध्याहतेषामर्थेति। पाचकादियोगिकानामपीत्य
र्थः। एतन्मतेप्रातिपदिकमात्रंसंज्ञानतुसंकेतवत्त्वगर्भिता। अग्रेनिरूप्यमानो
पाधिकसंज्ञायामव्याप्तेरितिध्यं। ननुशक्तिग्रहस्यैवसमानप्रकारकत्वेनशब्द
बोधहेतुता। पदजन्यपदार्थोपस्थितिस्तुनिर्विकल्पकसाधारणपदार्थज्ञानत्वे

नैवतन्नहेतुरितितस्यानिर्विकल्पकत्वेकाङ्क्षातिरेसतआह। नहीति। नचेति। निर्विक
ल्पकोपस्थितिविषयस्यशब्दानुभवविषयतानघटादीयर्थः। तुल्यंप्रकृतेपी
ति। आकाङ्क्षापदस्याप्याकाङ्क्षावैशिष्ट्यशक्तिग्रहादाकाङ्क्षावैशिष्ट्येपिशक्तिसिद्धि
रितिभावः। एतदेवोपपादयितुमाहनहीति। तत्रापि। गोगवयादिपदात्कदाचि
द्गवयगोसादृश्येनोपस्थितिसत्त्वेपिसममेवेति। आकाङ्क्षापदेपिलघुत्वाद्भ्रय
स्त्वमेवशक्यतावच्छेदकमित्यर्थः। शक्तिमानेयेति। आकाङ्क्षापदयादिशब्दंवाशक्यता
वच्छेदकतावच्छेदकंतदानुगतशब्दत्वावच्छिन्नस्यशक्यतावच्छेदकतयातदवच्छिन्न
शक्तिरूपैवस्यात्। शक्यतावच्छेदकभेदेनैवशक्तिभेदात्। यदिचकत्वखत्वादि
नदातन्नदवच्छिन्नककारखकारादेः शक्यतावच्छेदकस्यनानात्वात्तत्तदवच्छिन्नश
क्तिरपिनानैवस्यादितिवाच्यमानेसप्रसंगइत्यर्थः। ननुगोत्वादिविशिष्टशक्यत्वप्र

तीतावपि विशेषणेऽपि शक्तिसिद्धौ गौरवमेव बाधकमत आह किंचेति। ननु शक्यतावच्छेदकस्य गात्वादेः नियतत्वेऽपि तत्र शक्तिसिद्धौ गौरवं बाधकं तुल्यः परिहारमत आह अपि चेति। तथा च प्रामाणिकं गौरवं तन्नानुबाधकमिति भावः। अन्यथेति। अनुगत विशेषणविशिष्टपदानां शक्तत्वसिद्धौ विशेषणस्य शक्यतावच्छेदकत्वाभावे यजि गम्यादावपि पूर्वदेशविभागविशिष्टकर्मणः उत्तरदेशसंयोगाविशिष्टकर्मणा श्वश्चाद्विषयत्वाभावे शक्तिविशेषस्य कर्ममात्रस्यैकतुल्यत्वे शक्यतावच्छेदकभेदात्पर्यायभेदस्यवास्तवस्यानुपपत्तिरित्यर्थः। यजिगम्योर्मिथः पर्यायत्वं स्यात्। एकप्रवृत्तिनिमित्तकत्वेसतिभिन्नानुपूर्वीकत्वरूपस्यतयोः कर्ममात्रशक्तत्वे संभवादिति भावः। ननु यद्येकशब्दवाक्यारूढत्वं हितस्य श्रोत्रात्मकत्वं नस्यात्। श्रोत्रस्य पुरुषभेदेननानात्वादित्यत आह सएवचेति। अथ श्वश्रूः संयो

गाद्विभागाद्वाततो वीचीतरंगन्यायेनकदंबमुकुलन्यायेनवा शब्दपरंपरेतिसंप्रदाय मतदूषणायाह नन्वास्त्विति। असमवायीति। ज्ञानसुखादेः शरीरातिरिक्तदेशावच्छेदेनोत्पत्तिनिरासायासमवायिकारणपदं शरीरत्वंयदिविभुकार्यग्रादेशिकं नियामकंस्यात्तदाभेर्यांकाशसंयोगादितोभेर्यादिदेशएवशब्दोत्पत्तिः स्यात्। नचैवं आत्ममनःसंयोगस्याणुदेशीयत्वेनज्ञानसुखादेः शरीरव्यापित्वानुपपत्तेः। किंतुनिमित्तकारणग्रादेशिकत्वं। तथाचभेर्याकाशसंयोगादेस्तावद्दूरदेशावच्छिन्ननिमित्तपवनसंयोगसहकृतात्तावद्दूरदेशावच्छेदेनभेरिगजशुंडादंडवदेकएवशब्द उत्पद्यते। तेनसन्निहितदूरस्थपुंसांतारतम्येनशब्दसाक्षात्कारोपपत्तिरितिभावः। दीधितिकारमतमाह। अन्येकदेशिन इति। सिद्धांतविरुद्धप्रतिपादनादेकदेशित्वंतस्य। अत्रास्वरसोप्ययमेव। अन्यथावदांतिनोपि विजयेरन्नि

मित्याव:। जीवात्मस्वपीति। ईश्वरेच्छासमवायिकारणत्वकल्पनेएकैकंजीवमादायविनि
गमनाविरहात्सर्वजीवेषुतत्कल्पनप्रसक्तेरागौरवादित्यर्थः। निमित्तपवनानांतच्छक्तावच्छे
दंप्रतिनिमित्तत्वंकल्प्यमितिसमवायित्वमेवकल्प्यतामित्याशयवानाह। अस्तुवेति।
निमित्तपवनतुल्ययुक्तत्वाह। अथवेति। यत्रेति। मेर्यादीति। मेर्याद्यभिघातज: रा
ढ्:। मेर्याद्यारंभकपरमाणावेवजायते। मेर्यादोदंडाद्यभिघातसमयेतदारंभक
परमावधिअभिघातसंभवादित्यर्थः। ननुपरमाणुसामान्येराढ्समवायित्वक
ल्पनायांगौरवाल्लाघवेननिमित्तपवनपरमाणावेवतत्कल्प्यतां। राढ्मात्रंप्रति
निमित्तपवनकारणतायाःसर्वसंमतत्वादित्याशंकांपरिहरति। किंचेति। नचप
रमाणाविति। पृथिवीत्वजलत्वादीतरद्भेदत्वाप्यजातेःपरमाणावस्वीकाराच्छ
ढ्समवायिकारणतावच्छेदकवैजात्यस्यतत्रसंभवइत्यर्थः॥ ॥क्रमप्राप्तंकाल।

निरूपयति। कालइति। कालत्वादिति। अत्रयत्नेतरेष्वभिधातेनतत्कालोयथाद्र
व्यादि। नचायंनकालस्तत्स्पादितरेष्वभिघातेइकदाढ्यरणोपनयनिगमनानि
वेद्यानि। कालत्वंचेत्यादि। अत्रपरवैकालिकत्वंदिक्कृतपरत्वविपरीतत्वं। विलक्ष
णत्वमितियावत्। ननुकालकृतत्वमात्माश्रयापत्ते:। अत्रकालिकपरत्वायसमवायि
कारणकालपिंडसंयोगाश्रयत्वंपिंडेतिव्याप्तिवारणायविभुत्वंसतीत्युक्तं। संयोगा
श्रयत्वादीत्यादिनाकालिकापरत्वघटितनिर्वचनसंग्रह:। काललिंगस्यचरापर
व्यतिकरेत्यादिवक्ष्यमाणकाललिंगस्याविरोधात्। एकेनापिकालेनोपपत्ते:। का
लस्यनानात्वंजन्यत्वंचशंकतेनन्विति। एवंकालस्यनित्यैकत्वे। क्षणादंहीत्यादि। अ
वक्षणीकोतिरिक्तएवक्षणाइत्यपिप्रायेणाद्यंलक्षणं। विनश्यदवस्थसूर्यक्रियादि
रवक्षणाइत्यपिप्रायेणाद्वितीयं। उत्पद्यमानसूर्यक्रियादिरवक्षणाइत्यभिप्राये

पात्तीयं। स्ववृत्तीति। स्ववृत्तिध्वंसस्यय: प्रतियोगी तदनाधारत्वंस्वस्यक्षणासैंत्व
मित्यर्थः। सं। लक्ष्यत्वेनाभिमतोऽनिरिक्तक्षणः। तत्ववृत्तित्वंचकालिकसंबंधेनैव। अ
न्यथाक्षणद्वयावस्थायिनिध्वंसमात्रगोचरज्ञानादौविषयतयावृत्ति ध्वंसप्रति
योगिघटाद्यनाधारत्वादतिव्याप्तिःस्यात्। एवमनाधारत्वमपि। तेनैवसंबंधन।
अन्यथास्ववृत्तिध्वंसप्रतियोग्याधारत्वस्यस्वास्मिन्नेकक्षानाविषयत्वादिनासत्वा
दसंभवापत्तेः। इयमेवरीतिरुत्तरलक्षणद्वयेबोध्या। स्ववृत्तिभावदिति। स्ववृत्त
योयेयावंतोध्वंसास्तद्विनिष्टसमयत्वंस्वस्यक्षणत्वमित्यर्थः। सं। क्षणत्वेनाभि
मतंविनश्यदवस्थसूर्यक्रियादि। स्ववृत्तियत्किंचिध्वंसवैशिष्ट्यस्य क्षणावच्छेदेन
यावच्छिन्नक्रियायामप्यस्तीति। अतिव्याप्तिरतोयावदिति ध्वंसविशेषणं। तथा
चप्रतिक्षणं किंचिन्नश्यतीतिन्यायात्स्ववृत्तियावध्वंसवैशिष्ट्यं विनश्यदवस्थक्रि

यादावेवास्तीतिनकोपिदोषइति। तादृशध्वंसवैशिष्ट्यस्यमहाप्रलयेपिसत्वादतिव्याप्तिः
नचसोपिक्षणावेतिवाच्यं। तदानीक्षणान्यवहाराप्रयोजकेनतस्यक्षणत्वानभ्युपगमादतःस
मयत्वमिति। जन्यत्वमित्यर्थः। महाप्रलयस्य। कार्यमात्रानधिकरणत्वविशिष्टमहाका
लात्मकतयाजन्यत्वाभावान्नातिव्याप्तिः। चरमध्वंसस्यैवमहाप्रलयत्वपक्षेसमय
पदंजन्यभावपरमितिनकोपिदोषइति। स्वस्वपूर्वेति। स्ववृत्तिःसन्नयः स्वपूर्व
वृत्तिर्यावान्यदार्थस्तद्विनिष्टसमयत्वंस्वस्यक्षणत्वमित्यर्थः। स्वपदद्वयंक्षणत्वे
नाभिमतोसद्यमानसूर्यक्रियादिपरं। स्वपूर्ववृत्तियावत्पदार्थविनिष्टस्यस्वस्मि
न्नसत्वादसंभवः। प्रतिक्षणंकिंचिन्नश्यतीतिन्यायाद्यावंतदंतर्गतंकिंचित्पदा
र्थस्यस्वपूर्वक्षणावनाश्यादतः स्ववृत्तित्वमभ्युपेयं। तथाचस्वस्वपूर्ववृत्तिया
वत्पदार्थविनिष्टस्योत्पद्यमानसूर्यक्रियादावेवसत्वान्नासंभवः। स्ववृत्तियावत्प

दार्थविशिष्टस्या स्वस्वद्यमानक्रियादावसत्वादसंभवः। प्रतिक्षणंकिंचिदुत्पद्यतइतिन्या
यादुत्तरक्षणोत्पन्नपदार्थस्यचावदंतगतस्यप्रथमक्षणेसत्वादतःस्वपूर्ववृत्तित्वमप्य
पास्तं। स्वस्वपूर्ववृत्तियावत्किंचित्पदार्थविशिष्टस्यस्वक्षणाचतुष्टयावच्छिन्नस्यसूर्यक्रियादावपि
सत्वादतोयावदितिपदार्थविशेषणं। तथाचस्वस्वपूर्ववृत्तियावत्पदार्थविशिष्टस्य
क्षणाचतुष्टयावच्छिन्नेसूर्यक्रियादौकिंतूत्पद्यमानप्रतिक्षणंकिंचिदुत्पद्यतेकिंचि
न्नश्यतीतिन्यायादितिनातिव्याप्तिः। महाप्रलयकालीनचरमध्वंसेतिव्याप्तिवारणा
यसममपदंतदपिजन्यभावपरमितिस्वमासः। लवलक्षणमाहलवश्चेति। क्षणाद्
यत्वादिसादिनालवद्वयत्वादिरूपानिमेषत्वादेःसंग्रहः। तदुक्तं। क्षणाद्वयंलवः प्रोक्तो
निमेषस्तूलवद्वयं। अष्टादशनिमेषास्तु का - ष्ठिंशत्तुताःकला। १ त्रिंशत्कलोमुहू
र्तःस्यात्त्रिंशद्राग्रहनीतुते। अहोरात्राः पंचदशपक्षोमासस्तुतावुभौ। २ स्तुमा

३८

सद्वयंप्राक्तमयनंतुस्तुत्रयं। अयनद्वितयंवर्षंमानुषोयमुदाहृतः। ३ एवदेवस्यहोरा
त्रैःपक्षादिक्रमपूर्ववत्। दैववर्षसहस्राद्वैर्द्वादशैवचतुर्युगं। ४ चतुर्युगसहस्रंतुब्र
ह्मणोदिनमुच्यते। रात्रिस्तावतीतस्यतावंतःपक्षादिकल्पना ५ शंकांपरिहरतिस्वद्व
नीति। स्ववृत्तिध्वंसप्रतियोग्यनाधारविशिष्टस्यस्ववृत्तिमावत्ध्वंसविशिष्टसमयविशि
ष्टस्यवास्वस्वपूर्ववृत्तियावत्पदार्थविशिष्टसमयविशिष्टस्यवामहाकालस्यैवक्षणा
त्वं। एवंस्ववृत्तिध्वंसप्रतियोग्यनाधारद्वयविशिष्टमहाकालस्यैवलवत्वमेवमन्यद
पिरूढ्येनावसेयं। इहंवाभिन्नक्षणोघटइतिप्रतीतिव्यवहारेचस्ववृत्तिध्वंसेनादि
रूढार्थविशिष्टमहाकालएवक्षणत्वेनभासतइतिभावः। एतेनेयादिवक्ष्यमाणा
स्वरसादाह। अस्तुवेति। विशिष्टेति। स्ववृत्तियावत्पदार्थविशिष्टसूर्यक्रियादेःसंबंधस्य
वृत्तियावत्पदार्थविशिष्टसूर्यक्रियादेवेयर्थः। प्राचांमतेसूर्यक्रियायाएवकालोपाधि

त्वात्सूर्यक्रियोपपादनं। आदिनान्यमतेऽन्यमात्रस्यसंग्रहः। तन्मतेऽन्यमात्रस्यैव का
लोपाधित्वात्। एतत्कल्पेऽस्मिन्क्षणेघटइतिप्रतीतौव्यवहारेचपूर्वोक्तविशिष्टसूर्यक्रि
यादिरेवक्षणाधिकरणेनभासते। महाकालस्तुक्षणेघटसंबंधेवैतयेतिविवेकः। पूर्वतिपू
र्वंपूर्वायातन्नाम्नालिंगेनमहाकालानुमितिः संस्कारानुद्वारातत्प्रयोज्यस्मृतिरूपकाल सिद्धो
विशिष्टमहाकालाधिकरणिकायाइदानींघटइत्याकारायाउक्तप्रतीतेः। संभवान्नान्यो न्याश्र
यइत्यर्थः। अस्तुवेति। कल्पाभिप्रायेणाहुकालसंबंधकेति। सः। कालः। परापरेति। अत्रभा
वप्रधानोनिर्देशः। तथाचपरत्वापरत्वयोर्व्यतिकरोवैलक्षण्यंदिग्विपरीत। परत्वापरत्वइ
त्यर्थः। परापरव्यतिकरश्चयोगपद्यायोगपद्यचिराशिघ्रप्रत्ययाश्चेतिसमासः। तत्रकालैक्य
मनियम्यसतथोक्तः योगपद्यमेककालता। अयोगपद्यमनेककालता। चिरत्वंदी
र्घकालताक्षिप्रत्वमल्पकालता। अत्रसर्वत्रकालःसूर्यक्रियादिरेवायुगपद्वृत्तेतइति

DR BHAU DAJI

योगपद्यप्रत्ययः। अयुगपद्वृत्तेतइतिअयोगपद्यप्रत्ययः। चिरंतिष्ठतीतिचिरप्रत्ययः। शि
घ्रंतिष्ठतीतिक्षिप्रप्रत्ययः। अत्रयुगपदादिरात्मप्रतिपाद्यसूर्यक्रियादौघटाद्याधारतानि
रूपकसंबंधः सूर्यक्रियादिसमवायिसंयुक्तकालसंयोगादिसहकृतयाकालः सिध्य
तीतियोगपद्यादिप्रत्ययलिंगकत्ववोध्यं। परापरप्रत्ययालिंगत्वंसवतिहीयादि मू
त्रणवस्यन्नमितिनात्रप्रपंचितं। नियमेतीति। घटाद्यपेक्षयावहुत्वस्वपनपरिछेदान
रितत्वज्ञानस्यनियमेसंभवात्तत्रकालिकपरत्वापगमइत्यर्थः। अतएवेति। मनसि
व्यभिचारादेवेत्यर्थः। तथाचसर्वत्रकालिकपरत्वापरत्वोत्पत्तौसंयोगएवासमवायि
कारणं। सचैवस्वतः कालिकपिंडसंयोगएवेयतिरिक्तकालसिद्धिरितिभावः। ननुपिं
डगतसंख्यादेः कालगतसंख्यादेर्वातत्रासमवायित्वमस्तुनतुतदुभयसंयोगस्यविनि
गमकाभावादित्यतआहनापिसंख्यादिकमिति। आदिनापरिमाणपृथक्त्वविभा

गानांसंग्रहः। घटपटादिगतसंख्यादेस्तद्गतपरत्वाद्यसमवायित्वेकार्यकारणभावाननु
गमःस्फुटएवेतितदुपेक्ष्याहकालसंख्यादेरिति। घटादिपरत्वाप्रत्यासन्नस्यापिकालसंख्या
देस्तसमवायित्वेतिप्रसंगःस्यादितिभावः। ननुकालसंख्यादेःस्वसमवायिसंयुक्तस
मवेतत्वमेवघटादिपरत्वादौप्रत्यासत्तिःसंभवतीतितस्यैवतत्रासमवायित्वमियत आ
हविभुद्रव्येति। अत्रसंयोगस्यैवेतिविभागस्याप्युपलक्षणं। तथाचसंख्यादिविभुद्र
व्येषुमध्येयत्रयत्रविजातीयासमवायिकारणत्वंतत्रसंयोगविभागान्यतरत्वमिति
नियमोमूलेलक्ष्यते। ननुक्वचिद्वंशादलद्वयाकाशविभागस्यविजातीयनाद्यसमवा
यिकारणेसंयोगस्यास्त्वेवंतदन्यतरत्वसत्त्वान्नव्यभिचारः। एतन्नियमबलात्का
लिकपरत्वादावपिकालपिंडसंयोगएवासमवायीननुकालसंख्यादीतिसिध्यति। नचै
वंविनिगमनाविरहात्कालपिंडविभागस्यापिपरत्वाद्यसमवायित्वंसंभवतिक

थंनसंयोगस्यैवतत्वमितिवाच्यं। विभागस्यसंयोगपूर्वकत्वेनप्रथमोपस्थितसंयोग
स्यैवतत्वौचित्यादितिभावः। ननुकालिकपरत्वादौदिगादिपिंडसंयोगएवासमवाय्य
स्तुतुल्यन्यायादतआहकिंचेति। परत्वाद्याश्रयपिंडस्यविप्रकृष्टत्वाद्यंतर्गतस्यदृ
ष्टिनित्यंदसमवायिसूर्यसंयुक्तकालसंयोगात्यैकनकालघटितसंबंधेनेत्यर्थः। यदि
चदिगादिपिंडसंयोगएवकालिकपरत्वाद्यसमवायीतदाहृद्रासंदृष्टिनित्यादिगा
दिघटितसंबंधेनैववाच्येतिकालिकपरत्वादेर्दैशिकपरत्वाद्यपेक्षयावैलक्षण्यंनस्या
दितिपरापरादिप्रत्ययलिंगकत्वंकालस्यनुपपन्नमितिभावः। मतांतरमाहतथायी
ति। नित्यानामिति। नित्यपदार्थस्यकालिकसंबंधेनावृत्तित्वाद्विप्रकृष्टत्वांतर्गतस्य
दृष्टिनित्यत्वेऽपिविप्रकृष्टत्वज्ञानस्यपरत्वहेतोस्तत्रासत्त्वान्नपरत्वोत्पादइतिभावः। आ
हुश्चस्वरसेति विजंतुनित्यानांकालिकेनावृत्तित्वेकालस्यजगदाधारसंभज्यतेति। काल

कालस्यानियेकत्वेसाधितेतत्रप्रविष्टवर्तमानादिव्यवहारः। सोपाधिकएवेतिदर्शयति
वर्तमानेत्यादिना। प्रसंगाच्चतुर्णांपृथिव्यादिमाहात्म्यानांसृष्टिसंहारक्रमंब्युत्पादयति।
सृज्यादीति। इदं। वक्ष्यमाणरीत्यावसेयइत्यर्थः। रीतिमेवदर्शयति अथेत्यादि। ब्राह्मे
ति। चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते। रात्रिश्चतावतीतस्यनाम्यांपद्मादिकल्पनेति।
ब्राह्ममाननवर्षशतपर्यायंक्षयस्यार्थः। संसारोजन्मपूरणप्रबंधनिवृत्तिरिति। निवृत्ति
प्रलयइत्यर्थः। तदानींरात्रिनियामकसूर्यादिरसत्त्वात्। निरस्तेतद्दीपवर्तिरविरश्मि
जालुकाल्पविशेषस्याहः पदार्थस्यवासूर्यादिनियम्यत्वादिति। विश्रामार्थमित्यने
नप्रलयप्रयोजनमुक्तं। दिनश्रांतानामिवसर्गश्रांतानांविश्रामार्थंरात्रेरिवप्रलय
स्योत्पादनात्। ईश्वरसंज्ञिहीर्षासमकालमिति। ईश्वरस्यसंसारेच्छातदनंतरमित्य
र्थः। तनसंज्ञिहीर्षाया कर्मेच्छानिरोधादिकंप्रतियोजकत्वोपपत्तिः। यद्यपिम

गवदिच्छाअग्निरिवमकारणकरूपवतचाप्युपाधिमदात्संज्ञिहीर्षासिसृक्षेत्यादिरुच्यते।
उत्पत्तिविनाशावपितस्याउपाधिउत्पत्तिविनाशावेव। उपाधिश्चतन्नत्कार्यसामग्री समवधा
नमिति। वृत्तिनिरोधोफलजननसमयप्रतिबंधेसति। धर्माधर्मभावनातुविहाञ्चति।
प्रलयेधर्माधर्मावस्थनमग्निमरुद्युपपत्त्यर्थं। भावनावच्छानंचबालस्यस्तनपानादिप्र
वृत्तिजनकेष्टसाधनतादिस्मरणोपपत्त्यर्थमिति। आकाशादयश्चेति। चकारेणपाक
जरूपादयःसमुच्चीयते। तदसत्त्वेपरमाण्वद्यणुकादेरूपादिशून्यतापत्तेः। तावं
तमेवकालमिति। ब्राह्मवर्षशतात्मककालमित्यर्थः। संहारकालस्यापिसृष्टिकाल
तुल्यमानत्वादितिभावः। सृज्यादिक्रमश्चेत्थमितिप्रतिज्ञायप्रथमतः संहारक्र
मस्योत्पादनंसृष्टिप्रलयपरंपरायाअनिदंप्रथमतोद्योतयितुमितिबोध्यं। सृ
ष्टिक्रमंदर्शयितुत्तरमितिप्रलयोत्तरमित्यर्थः। उक्तक्रमेण। द्यणुकादिक्रमे

णा। सृष्टिः। चतुर्णांमहाभूतानांसृष्टिः। उत्पाद्यतइतिशेषः। प्राणिनां। प्राणसंबंधयोग्या
नां। तदानींप्राणसंबंधाभावादितिभावः। भोगादस्यनेननपुनःसृष्टेःप्रयोजनमुक्तं।
संहारक्रमाद्विपरीतएवसृष्टिक्रमइतिवाघादिक्रमेणतंदर्शयति। लुब्धवृत्तिकया
दिना। लुब्धावृत्तिः फलजननसमर्थोयैस्तान्यदृष्टानितद्वदात्मसंयोगजैःपव
नपरमाणुकर्मभिरित्यर्थः। तेषांपवनपरमाणूनां। ततस्तस्यामिति। पृथिव्युत्प
त्त्यनंतरमाधारभूतायांतस्यांतेजसपरमाणुभ्योद्व्यणुकादिक्रमेणोत्पन्नोमहा
तेजोराशिः केनाप्यनभिभवादृदीप्यमानस्तिष्ठतीत्यर्थः। यद्यपिपवनोत्पत्तेरनंतर
मेवतेजसउत्पत्तिप्रदर्शनमुचितंतथापिसर्वार्थदर्शिभिर्भाष्यकारैस्तथोक्त्वा
दत्रापितत्रोक्तं। महाभूतचतुष्कइति। नचतस्माद्घटस्तस्मादात्मनआकाशःसंभू
तइतिश्रुतावाकाशस्योत्पत्तिप्रतियादानमितिवाच्यं। धर्मिग्राहकमानेनलाघवादाकाशस्यनित्यैकत्वे
सिद्धेतद्भूतोत्पत्तिश्रुतेरन्यथाकाशान्वयपक्षेऽग्निपरत्वात्। वायवाद्यन्वयपक्षेचोत्पत्तिप
रत्वात्। वाय्वाद्युत्पत्तिविनाशयोः सर्वानुभवसिद्धत्वादितिभावः। केचित्त्वन्यथानुपपत्ता
वप्याकाशादेर्वाय्वादिसिसृक्षायांलक्षणिकमितिमन्यंतेतिरित्याहुः।
ईश्वरेति। ईश्वरस्याभिध्यानंसंकल्पोब्रह्मांडंसवलियाकारस्तन्मात्रादिरित्यर्थः। विनिवृ
त्तेः। तमेवकुर्दिज्ञापयति। यदाचेश्वरएवब्रह्मत्वेनव्यपदिश्यतेइतिमतंतदामेदोपचा
दायचारादिनियोगोलोकसिद्ध्यर्थोबोध्यं। नचभगवतिकर्तरिजोगस्तेकिंब्रह्मणेति
वाच्यं। शरीरान्वयव्यतिरेकानुविधायिनस्तत्कार्यविशेषणस्यास्याप्यक्षेप्यत्वात्। तस्य
जीवपक्षेतुतदीयकर्मविशेषणताद्दृष्ट्याधिकारसंपत्तिभोगार्थंतस्यापिकल्पने
क्षितिविरुद्धाजाति। अतिशयज्ञानेति। यद्यज्ञःस्यात्तदास्यमर्थोपितत्तत्कार्यंनस्यात्

त्। यदि रागवान् स्यात् तदा नकर्माण्यनुरुध्यात्। तथा च कृतहानमकृताभ्यागमश्च
प्राणिनां स्यात्। यदि चैश्वर्यवान् स्यात् तदा ज्ञानवानप्ययमयं चिंतनं कार्यं न साधु
येति चिंतयसंपन्नत्वमस्योक्तं। तदनुरूपेति। कर्मानुरूपं ज्ञानवैराग्यैश्वर्यभोगआयु
रवयवांताहरणानीत्यर्थः। अत्रकृतान्मानसानीतिचसर्वत्रसंबध्यते। प्रजापतीन्दक्षा
दीनमनुसर्वायंभुवादीन्देवानादित्यादीन्नक्षत्री। नौतमादीन्पितॄन्कव्यवाळादी
न्। गणान्कूष्मांडादीन्। प्रजापतयतयस्तन्नियतप्रजास्रष्टारः। मनवोराजधर्म
प्रवर्तयितारः। देवाःहविर्भोक्तारः। ऋषयःप्रथमवेदाध्येतारः। अतएतयोयन्मंत्रस्य
प्रथममध्येतासतस्यऋषिरितिप्रदिः। पितरःस्वधाभागिनः गणावेणिभाजिनः।
मुखतः। मुखाद्ब्राह्मणं। बाहुभ्यांराजन्यं। ऊरुभ्यांवैश्यं। पद्भ्यांशूद्रं। अन्यानिचैन
